NYĀYĀSARA

OF

Āchārya Bhāsarvajna
with the Nyāyasārapadapanchikā of
Vāsudeva of Kāshmir

आचार्यभासर्वज्ञप्रणीतो न्यायसारः
काश्मीरिकसूर्यसूनुवासुदेवविरचितया
न्यायसारपदपञ्चिकया समेतः

Critically Edited

BY

MAHAMAHOPADHYAYA PANDIT
VĀSUDEOSHASTI ABHYANKAR

AND

PROFESSOR C R DEVADHAR M. A.
Fergusson College, Poona,

POONA

R. S. GONDHALEKAR'S BOOK-DEOPT,

1922.

PREFACE.

No apology I deem is necessary for this edition of the Nyāyasāra with the very valuable commentary of Vāsudeo of Kashmir which is among the earliest of the numerous commentaries on the book In preparing this edition I have collated the following MSS all from the Bhāndārkar Oriental Research Institute —

1 क No 391 of 1875 76 which contains the commentary herein printed
2 ग No 800 of 1887 1891
3 घ No 89 of 1873 1874

Besides this I have occasionally consulted Ms No 776 of 1884 1887 which contain the text interposed with the commentary called Nayakalanidhi of Mahadevashrama The already printed editions of the text one by Mr V P Vaidya and the other by the late Dr Satis Chandra Vidyā bhushana which proved of great use to me are marked इ and च respectively

To Dr S K Belvalkar Superintendent Ms Department of the aforesaid Institute I am indebted for his kindness in lending me these Mss I also desire to express a more general debt to Prof K V Abhyankar M A of the Gujarath College for advice and criticism My best thanks are due to Dr N G Sardesai I M S of the Oriental Book Supplying Agency for having undertaken the publication of this edition

FERGUSSON COLLEGE
9 July 1922

C R DEVADHAR.

INTRODUCTION.

The Nyāyasāra is a brief compendium of the Nyāya in three chapters While generally agreeing with Gautama and his school, his work shows considerable traces of Jain and Buddhist influence Thus in his treatment of the subject he sets aside the old division of sixteen categories which the Buddhist rejected and confines himself to the topics of the means of valid knowledge, although many of the logical and dialectical categories of Gautama are enumerated and explained in conjunction with the question of inference. More striking is Bhāsarvajna's rejection of comparison as a separate means of proof and he is at great pains to answer any objection on the ground of his divergence from the Sūtrakāra If the Sūtrakāra enumerates comparison side by side with perception, inference and verbal testimony, it does not mean, contends Bhāsarvajna that the Sūtrakāra recognised comparison as an independent means of proof, rather as in the case of example and the fallacies which are separately dealt with, though already included in the Pramanas and the Nigrahasthānas respectively, so in the present instance we have to read a deeper motive of the Sūtrakāra The followers of Buddha doubt the validity of word as a means of proof on the ground that verbal testimony is merely corroboratory of the knowledge that is derived through perception and inference and so like memory is not infallible Nor can it be maintained that verbal testimony applies where perception and inference fail For, in the first place, it is hard to conceive of an object which cannot be established by perception and inference, and secondly such an object can never

be established through word since the knowledge through word pre-supposes the connection of word as the name and the object as the thing signified by such a name which connection is hard to establish in such a case Our author s answer to the objection is somewhat flimsy He says that it is possible to establish this connection between the object and the name even though the former is yet unperceived as in the case of knowledge derived through comparison where we establish the connection of Bos Gavaeus as the object signified and Gavaya as the name which signifies that object even though the former is unperceived by us on the strength of the asser tion of a reliable man that a Bos Gavaeus is like a cow! Thus in the view of Bhāsarvajna the separate mention of comparison in the sūtras does not point to its recognition as an independent means of proof but simply to its serviceable ness as an illustration to establish the validity of verbal authority

The futility of this contention is clear enough and the sutras themselves do not countenance such a view this therefore is an obvious instance of our author s anxiety to bring his treatment of the subject in a line with the methods current in his time It is probable that in this inclusion of comparison under word our author followed the Jainas for Siddhasena Divakara in his Nyayavatara divided means of proof into direct and indirect and included Perception under the first and Inference and word under the second It is to be remarked however that the same three were ad opted by the Sāmkha and the Yoga Further striking parallelism with the Jainas and the Buddhists are Bhāsar vajna s division of inference into that for oneself and that for others and his exposition of the fallacies of minor term and the fallacies of example

One more point of interest in the work is its refutation of the atheism of the Buddhists who abandon the Vedāntic conception of the Absolute or the sāmkha idea of spirit and accept only the fleeting series of mental impressions as a quasi reality The soul is established by our author by inference. It is the substrate of effects like cognition, pain and pleasure, this substrate the sense cannot be, for in that case we will not feel pleasure or pain when the sense-organ becomes multilated, but this is contrary to experience Nor again can the body be regarded as the substrate, for the body ever changes, so that what we experienced as young men will not be remembered by us as old men, but we know that impressions endure though the senses fail us, though the body fails us Similarly of the doctrine of the Buddhas of a fleeting series of mental states, a previous mental state is different from a succeeding one, so that the experience we had in the previous state cannot endure in the succeeding one, but this is contravened by our experience If it be said that spite of the difference between the two states, it is possible to retain impressions of the one in the other, related as they are to each other as cause and effect, we answer that this cannot be, for even though we admit the possibility of the qualities of the cause enduring in the effect, such a presumption is barred in the case of the Buddhas, since their theory is that an effect arises when the cause is completely destroyed And hence by elimination we have to accept the existence of the soul

The Soul is of two kinds, the absolute, which is one, all powerful, eternal, not subject to the limitations of our transient existence, Maheshwar the all-wise, and the individual soul Further our author states that through the grace of this omniscient creator, the worshipper obtains as a reward of his devotion, release in the form of eternal pleasurable cons-

ciousness To Bhāvarvajna the Vaisheshika idea of a state of release without happiness like that of a stone, or the Vedāntic one that each who seems a separate whole should fuse all the skirts of self again and remege in the absolute was "faith as vague as all unsweet."

From these premises, it is inferred that our author must have flourished at a time when Jain and Buddhist influence was strong and accordingly Dr Satis Chandra Vidyābhusana places him in the early years of the 10th century. He has pointed out that one of the earliest commentary on the work —the Nyāyabhūsna is quoted by the Buddhist sage Ratnakirti, preceptor of Ratnakirti Sānti who lived about 983 A D and he is placed after Dharmakirti, the Buddhist logician (650 A.D) whose controversy about the fallacy of non-erroneous contradiction (विरुद्धाव्यभिचारि) seems to have been referred to in the Nyāyasāra He shows a marked Shaiva influence, and so it is further premised of him that he was a native of Kāshmir where Shaivabelief was always strong.

Vāsudeo, the commentator was the son of Sūrya and a native of Kāshmir Nothing is known about his personality The verve and the strong controvertial animus that he displays in the commentary points to a period when Buddhist and Jain logic excited the liveliest interest, and this is rendered more plausible if we can place him immediately after the author; and we have evidence to do so In the colophon to his work he refers to the Nyāyabhūsana and says that the present commentary is designed for those who are unable to follow the bigger commentary, the Nyāyabhūsana; and in the body of the commentary, while explaining the Nigrahasthāna Prātijnahāni he says that this Nigrahasthāna also includes

other minor varieties such as Prātijnavisheshahāni which are explained by him in his Nyāya-Bhushana. If, therefore, we can believe him to be the author of the Nyāya-Bhūshana from which Jayasimhasuri freely quotes, we shall have to place him in the middle of the tenth century *i e* immediately after Bhāsarvajna, if we accept the early years of the 10th century as his probable date

C R DEVADHAR.

विषयानुक्रमणिका.

॥ श्री ॥

भासर्वप्रणीतन्यायसारः,
वासुदेवकृतपदपंचिकया समेतः ॥

ॐ देवदेवमभिवन्द्य शाश्वतं । योगिवृन्दहृदयैकमन्दिरम् ॥
वासुदेवविदुषा विरच्यते । न्यायसारपदपंचिका परम् ॥

तत्र तावच्चिकीर्षितग्रन्थस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवताप्रणतिपुरःसर श्रोतृजनमनःसमाधानार्थं सप्रयोजनमभिधेयं प्रतिजानीते ।

प्रणम्य शम्भुं जगतः पतिं परम् ।
समस्ततत्त्वार्थविदं स्वभावतः ॥
शिशुप्रबोधाय मयाभिधास्यते ।
प्रमाणतद्भेदतदन्यलक्षणम् ॥

श सुख भवत्यस्मादिति शम्भुः तम् । कम् । विशिष्ट जगतस्त्रैलोक्यस्य पतिं स्वामिनम् । देवेन्द्रादीनामपि जगत्पतित्वमस्तीति तद्व्यवच्छेदायाह परमिति । उत्कृष्टमित्यर्थः । अनन्यप्रेष्यमिति यावत् । इन्द्रादयः पुनरीश्वरप्रेष्यत्वेन न परा इति भावः । परत्व ब्रह्मादीनामप्यस्तीति तद्व्यवच्छेदार्थमाह समस्ततत्त्वार्थविदमिति । प्रमाणोपपन्न स्वरूप तत्त्व । तेन विशिष्टा अर्थास्तत्त्वार्थाः । समस्ताश्च ते तत्त्वार्थाश्चेति समस्ततत्त्वार्थास्तान्वेत्तीति समस्ततत्त्वार्थवित् । त तथाभूत सर्वज्ञमित्यर्थः । सर्वज्ञत्व योगिनामप्यस्तीति तेभ्यो विशेष दर्शयति स्वभावत इति सर्वदैवेत्यर्थः । योगिनस्तु योगाभ्यासप्रसादसमासादिततत्त्वज्ञानवशादेव समस्ततत्त्वार्थविद इति न स्वाभाविकसर्वज्ञा इति भावः । तमित्थंभूत प्रणम्य प्रकर्षेण भक्तिपुरःसर नत्वा प्रमाण च तद्भेदाश्च प्रत्यक्षादयः तदन्ये च प्रमेयादयः प्रमाणतद्भेदतदन्ये, तेषां लक्षणमितरेतरव्यावर्तको धर्मः । स मया सर्वज्ञेनाभिधास्यते कथयिष्यते । किमर्थं शिशुप्रबोधाय । शिशव इव शिशवः प्रमाणादिपदार्थलक्षणज्ञानशून्याः शास्त्रश्रवणयोग्या विवक्षिता न पुनः स्तनधयाः । तेषां प्रबोधाय तत्त्वज्ञानोत्पादनायेति शास्त्र-

स्यास्य प्रयोजनकथनम्। तत्राबालानामपि शिशुशब्दाभिधान शुश्रूषयोपपन्नः शिशुवत्सस्नेह व्युत्पादनीय इति ज्ञापनार्थम्।

ॐ प्रमेयादिपरिज्ञानस्य प्रमाणाधीनत्वात् प्रथमोद्दिष्टस्य प्रमाणस्य सामान्यलक्षणमाह।

सम्यगनुभवसाधनं प्रमाणम्॥

सम्यक् चासावनुभवश्चेति सम्यगनुभवस्तस्य साधन करणम्। प्रमीयते येन तत्प्रमाणमिति प्रमितिकरणभूतस्य प्रमाणस्य लक्षणाभिधानमतो नाव्याप्तिः। अन्यथा प्रमितिः प्रमाणमिति फलभूतस्य ज्ञानस्य सम्यगनुभवसाधनत्वाभावादव्याप्तिः स्यात्। अत्र च सम्यक्त्वमनुभवत्व च सशयविपर्ययत्ववद्ज्ञानावान्तरजातिविशेषः। अबाध्यमानाध्यवसायात्मकत्वं सम्यक्त्वम्। स्मरणविलक्षणज्ञानस्वरूपत्व पुनरनुभवत्वम्। विशेषणस्यातिप्रसगापाकरणार्थत्वात् सम्यगित्यस्य विशेषणस्य व्यवच्छेद्य दर्शयति।

सम्यग्ग्रहणं संशयविपर्ययापोहार्थम्॥

सशयविपर्ययोरपोहः प्रमाणफलादनुभवाद्व्यावर्तनम्। सशयविपर्ययाभ्या वापोहो व्यवच्छेदः प्रमाणफलस्य। स एवार्थः प्रयोजन यस्य तत्तथोक्त। यदा तु सशयविपर्ययोरनपोहस्तदा तत्साधन न भवतीत्यर्थः।

अज्ञातस्वरूपयोः सशयविपर्ययोरपोहो ज्ञातु न शक्यत इति तदवगमार्थं तल्लक्षणमाह।

तत्रानवधारणज्ञानं संशयः॥

तत्र तयोर्मध्ये, अनवधारण च तद् ज्ञान चेति विग्रहः। न चावधारणाभाववाचकत्वादनवधारणशब्दस्य कथ ज्ञानपदेन सामानाधिकरण्यमिति वाच्यम्, तस्य निश्चयत्वजातिरहितव्यक्तिवाचकत्वात्। तस्यावान्तरभेदानाह।

स च समानधर्मोऽनेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारणभेदात् पंचधा भिद्यते॥

समानधर्मानेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धयश्च ताः कारणानि च तेषां भेदात्। अत्रासाधारणकारणभूतानां समानधर्मादीनां भेदात्संशयस्य भेदो-

ऽभिहितः । न पुनः कारणमात्रभेदात् । अनेककारणजन्यस्यापि घटस्यैकत्व-दर्शनात् । एव च समानधर्मादसाधारणकारणाद्विशेषाग्रहादितरकारणसहि-ताज्जायमानः संशयोऽनेकधर्मादिकारणजनितसंशयेभ्यो भिद्यत इति योज्यम् । एवमुत्तरत्रापि । तेषां सशयानां स्वरूपमाह ।

तद्यथा समानधर्मात् किमयं स्थाणुः स्यात् पुरुषो वेति ।

स्थाणुपुरुषयोः समानः साधारणो धर्म ऊर्ध्वत्वम् । तस्मात्सः । तच्चोर्ध्वत्वमूर्ध्वव्यवहारकारण सामान्यमवयवरचनाविशेषो वा । इति शब्दः प्रकारार्थः । एवप्रकारः सशय उत्पद्यत इत्यर्थः । एवमुत्तरवाक्येष्वपीति-शब्दो व्याख्येयः ।

द्वितीयसशयमाह ।

अनेकधर्मादाकाशविशेषगुणत्वात्किमयं शब्दो नित्यः स्याद-नित्यो वेति ॥

समानासमानजातीयमनेकमिहाभीष्टम् । अनेकस्माद्व्यावर्तको धर्मोऽने-कधर्म इति मध्यमपदलोपी समासः, असाधारणधर्म इति भावः । ननु स्थाणुत्वादिपुरुषत्वादिविरुद्धोभयविशेषैः सह समानधर्मस्योर्ध्वत्वस्य पूर्वमुप-लम्भात् पश्चाद्दूरत्वादिनिमित्तेन विशेषद्वयाग्रहेण समानधर्मः केवल एवोपलभ्यमानस्तत्स्मृतिद्वारेण सशयहेतुरिति युक्तम् । असाधारणस्तु धर्मो विरुद्धोभयविशेषैः सहादृष्टः कथ तत्स्मृतिहेतुस्तदहेतुश्च कथ सशयोपाय इति व्यतिरेकमुखेनेति ब्रूमः । तथाहि नित्येभ्यो व्यावृत्तधर्मयोगी खल्वनित्यो दृष्टः, अनित्येभ्यश्च व्यावृत्तधर्मयोगी खलु नित्यः । शब्दस्तु नित्यानित्यव्यावृ-त्तेनाकाशविशेषगुणत्वधर्मेण युक्तः । तस्मादनित्यव्यावृत्तधर्मत्वान्नित्यः स्यादुत नित्यव्यावृत्तधर्मत्वादनित्यः स्यादिति सदेहः । नन्वेवमपि समानधर्मासाधा-रणधर्मविप्रतिपत्तीत्यादि वाक्य क्रियतां, किमनेकधर्मत्वग्रहणेनाप्रसिद्धाप्रकृता-र्थेनेति । सत्यम् । अनेकश्चासौ धर्मोऽनेकधर्मः, सोऽपि सशयहेतुरिति ज्ञाप-नार्थत्वाददोषः । तथाहि विरुद्धार्थद्वयाविनाभूतधर्मद्वयस्यैकत्रोपलम्भाद्विशे-षाग्रहणादिसहकारिणि च सति सशयः, यथा क्रियावत्त्वान्मूर्ते मनः किं वा स्पर्शशून्यत्वादमूर्तमिति । अनेकधर्मस्य तु विप्रतिपत्तिवदेव सशयहेतुत्वम् ।

विरुद्धार्थद्वयप्रतिपादकवचनद्वयी विप्रतिपत्तिः । विरुद्धार्थाविनाभूतधर्मद्वयं ह्यनेकधर्म इति नानयोरत्यन्तभेदोऽस्तीति ।

इदानीं विप्रतिपत्तिजनितं संशयं दर्शयितुकामो विप्रतिपत्तिस्वरूपं तावदाह।

विप्रतिपत्तेरेके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानीति ॥

एवंरूपाया विप्रतिपत्तेः सकाशात्किमिन्द्रियाणि भौतिकान्याहोस्विदभौतिकानीति । संशयोऽयं मध्यस्थस्य विशेषमजानानस्य जायते इति शेषः । चतुर्थपञ्चमौ संशयौ दर्शयति ।

उपलब्धेः, किं सदुदकमुपलभ्यत उतासदिति । अनुपलब्धेः किमविद्यमानः पिशाचो नोपलभ्यते किं वा विद्यमान इति ॥

विधिमुखेन ज्ञानमुपलब्धिः । उपलब्ध्यभावोऽनुपलब्धिः । न चात्र केवलमुपलब्धिरनुपलब्धिर्वा संशयकारणं येनातिप्रसङ्गः स्यात् किंतु विशेषाग्रहणादिसहकारिसहिताऽतो नातिप्रसंगः । यद्यप्यनयोः समानधर्मान्नैव भेदस्तथापि प्रयोजनवशात्सूत्रकारेण पृथगभिहित इति तदनुसारिणा संग्रहकृता पृथगुक्त इति । प्रयोजनं च परपक्षप्रतिक्षेपः । तथाहि शब्दे स एवायमिति स्थायितोपलभादविनाशित्वमदृष्टेश्वरादेश्चानुपलब्धेरसत्त्वं केचित्प्रतिपन्नाः । तदयुक्तम् । विशेषग्रहणाभावे हि खलूपलब्धिमात्रस्यानुपलब्धिमात्रस्य च संशयहेतुत्वात् । प्रत्यभिज्ञानं तु प्रदीपादिष्विव । अनुपलब्धिस्तु भूतलान्तर्गतजलादाविवान्यथाप्युपपद्यमानत्वान्न निर्णयकारणमिति ।

सम्यग्ग्रहणेन चेत्संशयविपर्यययोरपोहस्तदूहानध्यवसाययोः केन पदेनापोह इत्याशङ्क्याह ।

अनवधारणत्वाविशेषादूहानध्यवसाययोर्न संशयादर्थान्तरभावः॥

अनिश्चयात्मकत्वमेवानयोराह ।

तद्यथा। वाह्यालीप्रदेशेऽनेनं[1] पुरुषेण भवितव्यमित्यूहः । किंसंज्ञकोऽयं वृक्ष इति ह्यनध्यवसायः ॥

---

१ ग., ङ, च. Read पुरुषेणानेन ।

प्रायेणानेन पुरुषेण भवितव्यमित्यनिश्चयरूप ऊहः । न पुनः पुरुष एवेति निश्चयरूपः । अनध्यवसायो हि का संज्ञास्यासौ किंसंज्ञक इत्यनिश्चयात्मक एवोपपद्यत इति, तस्मादनयोः संशयात्मकत्वात्सम्यग्ग्रहणेनैव व्यवच्छेद इत्यर्थः । ममात्र संशयोऽस्तीत्यशेषपुरुषहृदयसाक्षितया संवेद्यमानस्य निराकरण परेषामशक्त्वमेव प्रकाशयति ।

सप्रपञ्च संशयमभिधाय विपर्ययस्य लक्षणमाह—

मिथ्याऽध्यवसायो विपर्ययः ॥

अध्यवसायः समीचीनोऽप्यस्तीति तद्व्यवच्छेदाय मिथ्याग्रहणम् । मिथ्यात्व चातस्मिंस्तदिति ज्ञानरूपत्वम् । तत्संशयेऽप्यस्तीति तन्निरासायाध्यवसायग्रहणम् । उदाहरणमाह ।

तद्यथा । द्वौ चन्द्राविति । सुप्तस्य गजादिदर्शनं चेति ॥

सकलविपर्ययप्रभेदावबोधार्थमुदाहरणद्वयमुक्तम् । परपक्षप्रतिक्षेपार्थं च । वैशेषिकाः खलु संशयविपर्ययप्रमितिस्मरणेभ्यो विलक्षण स्वप्नज्ञान मन्यन्ते । तदयुक्तम् । सुप्तस्याविद्यमाना असन्निहिता वाश्वगजादयो विद्यमानत्वेन सन्निहितत्वेन च गृह्यन्त इति तद्विषय ज्ञान विपर्यय एव । यस्तु गजो वा महिषो वेति प्रत्ययः, स संशयः । स्वप्ने बन्धुदर्शनजनितसुखानुभवस्तु प्रमा । सुप्तस्यैवातीतस्वप्नानुसन्धान स्मरण । अतो न प्रमेयान्तर पश्यामः । अधिगतशुक्तिशकलमेव रजतमित्येतावन्त काल गृहीतमिति तद्विषयो रजतमिति प्रत्ययो विपर्ययः । तत्सद्भावे प्रमाणमनुमानम् । तथाहि विवादपद शुक्तिशकलं रजतज्ञानविषयः । रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात् । सम्यग्रजतवत् ।

प्रमाणलक्षणान्तर्गतानुभवग्रहणव्यावर्त्यमाह ।

स्मरणग्रहणव्यवच्छेदार्थमनुभवग्रहणम् ॥

---

१ ङ., reads गजदर्शनम् ।

२ ग., ङ., च. ज्ञानव्य॰

सम्यक्साधनं प्रमाणमित्युक्ते, स्वर्गादेरज्ञातरूपस्यापि साधन यागाद्यपि प्रमाण स्यात् । तथापि सम्यग्ज्ञानसाधन प्रमाणमिति सिद्धेऽक्षराधिकस्यानुभवशब्दस्योपादान स्मरणस्यापि व्यवच्छेदार्थमित्यर्थः । स्मरणविलक्षणं हि ज्ञानमनुभवः । अथ साधनग्रहणायोग्यमाह ।

प्रमातृप्रमेयव्यवच्छेदार्थं फलाद्भेदज्ञापनार्थं च साधनग्रहणम् ॥

सम्यगनुभवः प्रमाणमित्युक्ते, फलभूतस्यानुभवस्य प्रमाणत्वप्रसंगः । तथापि सम्यगनुभवहेतुरिति सिद्धे, साधनमिति गुरुकरण प्रमातृप्रमेयव्यवच्छेदार्थम् । साध्यते येन तत्साधनमिति करणव्युत्पत्तेरिह विवक्षितत्वात्, कर्मकर्तृविलक्षणस्य क्रियाहेतोः करणत्वात् ।

साधनग्रहणव्यवच्छेद्यत्वेन प्रस्तुतयोः प्रमातृप्रमेययोर्यल्लक्षण तत्तयोर्लक्षणभूतायाः प्रमाया लक्षणाभिधानद्वारेणाह ।

सम्यगनुभवः प्रमा । प्रमाश्रय प्रमाता । प्रमाविषय प्रमेयमिति ॥

तत्र प्रमाया आश्रयः प्रमोत्पत्तौ समवायिकारणम् । प्रमाया विषय आलम्बन प्रमेय प्रतिभासमानोऽर्थ इति यावत् । इतिशब्दः प्रमाणसामान्यलक्षणपरिसमाप्तिसूचकः ॥ तद्भेदमाह ।

तत्त्रिविधम्[1] ॥

तिस्रो विधाः प्रकारा यस्य तत्त्रिविधम् । प्रकारत्रयमाह ।

प्रत्यक्षमनुमानमागम इति ॥

इतिशब्दः प्रकारार्थः, अनेन प्रकारेण त्रिविधम् । अन्यथा तु सप्तविधत्वादिकमपि संभवत्येव । तथाहि निर्विकल्पकसविकल्पकभेदेन योग्ययोगिप्रत्यक्षभेदेन वा द्विविधं प्रत्यक्षम् । कार्यकारणानुभयात्मकभेदेन त्रिविधमनुमानम् । दृष्टादृष्टविषयत्वेन द्विविध आगम इति सप्त प्रकाराः ।

---

१ च. क. add प्रमाणम् ।

इतरप्रमाणमूलत्वेन ज्येष्ठत्वात्प्रथमोद्दिष्टस्य प्रत्यक्षस्य सामान्यलक्षणमाह ।

तत्र सम्यगपरोक्षानुभवसाधनं प्रत्यक्षम् ॥

अत्रापि सम्यगनुभवसाधनशब्दानां व्यवच्छेद्यं पूर्ववत् । अपरोक्षग्रहणेन पुनरनुमानादेर्व्यवच्छेदः । अपरोक्षत्व हि ज्ञानत्वावान्तरजातिः । अनुमानादिक तु परोक्षत्वजातिमतोऽनुभवस्य साधनमतोऽस्य निरासः । भेदमाह ।

तद्द्विविधं । योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति ॥

चकारो निर्विकल्पकसविकल्पकभेदेनापि द्वैविध्य वक्ष्यमाणं समुच्चिनोति । विशिष्टत्वेन प्रथममुद्दिष्टस्यापि योगिप्रत्यक्षस्यास्मदादिप्रत्यक्षदृष्टान्तबलेन वेद्यत्वादादौ तदेव लक्षयति ।

तत्रायोगिप्रत्यक्षं प्रकाशदेशकालधर्माद्यनुग्रहादिंद्रियार्थसंबंधविशेषेण[1] स्थूलार्थग्राहकम् ॥

प्रकाश आलोको मनसः समाधिश्च । देशः समीपपुरोवर्त्यादिः । कालो वर्तमानादिः । धर्म इष्टज्ञाने । आदिशब्दादनिष्टोपलब्धावधर्मः । ईश्वरेच्छापि सर्वकार्यनिमित्तत्वात् स्वीक्रियते । रसादिज्ञाने दन्तान्तर्गतोदकादिः । तेषामनुग्रहः साहाय्य तस्मात् । इन्द्रियाणि चक्षुरादीनि । अर्थाः पृथिव्यादयो रूपादयश्च । तेषा मिथः सम्बन्धविशेषः संयोगसंयुक्तसमवायादिः । तेनासाधारणकारणेन सह । स्थूल इव स्थूल अस्मदादिप्रत्यक्षयोग्यः । तस्य ग्राहक ग्रहणकरणभूत यत्तदयोगिप्रत्यक्षम् । करणस्यापि कर्तृतोपचारो ण्वुल् प्रत्ययः । न चेदृश योगिप्रत्यक्षमिति ततोऽस्य भेदः । न तु स्थूलस्यैव ग्राहकमिति व्याख्येयमस्थूलस्यापि रूपादेर्ग्रहणात् । इंद्रियार्थसम्बन्धे च प्रमाण, चक्षुःश्रोत्रे प्राप्तमेव प्रकाशयतः, बाह्येंद्रियत्वात् त्वगिंद्रियवत्, प्रकाशत्वे सति व्यवहिताप्रकाशकत्वाद्वा प्रदीपवत् । प्रत्यक्षप्रमाणस्य प्रायेणातींद्रियत्वात्तत्फलमेव सबधविशेषोपदर्शनद्वारेणोदाहरति ।

---

[1] ग. reads विशेषणस्थूला०

तद्यथा । चक्षुःस्पर्शनसंयोगाद्घटादिद्रव्यज्ञानम् ॥

चक्षुषा स्पर्शनेन च संयोगाद् घटादिद्रव्यज्ञानमुत्पद्यत इति शेषः । सम्बन्धान्तरात् प्रत्यक्षज्ञानं दर्शयति ।

संयुक्तसमवायात्ताभ्यां घटत्वसंख्यापरिमाणादिज्ञानम् ॥

ताभ्यां चक्षुःस्पर्शनाभ्यां संयुक्ते द्रव्ये समवायः संयुक्तसमवायस्तस्मात् संयुक्तसमवायात् । आदिशब्दस्य प्रत्येकमभिसंबन्धात् घटत्वसत्त्वपृथिवीत्वादीनि, संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वकर्माणि, द्वीन्द्रियग्राह्याणि गृह्यन्ते । हस्तवलनं प्रत्यक्षम्, प्रत्यक्षाश्रितत्वे सति संयोगासमवायिकारणत्वात्, संयोगवत् । कर्मत्वं वा प्रत्यक्षम्, प्रत्यक्षाश्रितसंयोगासमवायिकारणाश्रितत्वात्, संयोगत्ववत् । न चाश्रयासिद्धं साधनम् । जातिरूपस्य कर्मत्वस्य परैरनभ्युपगमेऽप्युपाधिरूपस्याभ्युपगमात् नाश्रयाद्यहीनमुदाहरणम् । एतस्मादेव संबन्धादेकैकेन्द्रियग्राह्येषु ज्ञानान्याह ।

चक्षुषैव रूपज्ञानम् । स्पर्शनेनैव स्पर्शज्ञानम् । घ्राणेनैव गन्धज्ञानम् । रसनेनैव रसज्ञानम् । मनसैव सुखादिज्ञानमिति ॥

सर्वत्र संयुक्तसमवायादित्यनुवर्तते । चक्षुषैवेत्यादावेवकारो बाह्येन्द्रियान्तरनिषेधार्थः । रूपादिज्ञानेषु मनसोऽपि हेतुत्वान्मनसैवेत्यत्रैवकारो बाह्येन्द्रियाणां प्रतिषेधपरः । न पुनरदृष्टादेः । इतिशब्दः संयुक्तसमवायपरिसमाप्तौ ॥ अधुना संबन्धान्तराज्ज्ञानोत्पत्तिमाह ।

एतेषु संख्यादिष्वाश्रितानां सामान्यानां स्वाश्रयग्राहकैरिन्द्रियैः संयुक्तसमवेतसमवायाद्ग्रहणम् ॥

संख्यादिष्वित्यादिग्रहणेन घटादित्वनिरासः । सामान्ये सामान्यान्तराभावात् । सामान्यानामिति सत्त्वसंख्यात्वपरिमाणत्वादीनाम् । स्वाश्रयग्राहकैरिन्द्रियैरिति तत्र संख्यात्वादिकर्मत्वान्तानां द्वाभ्यां चक्षुःस्पर्शनाभ्यां

---

१ घ ङ् घटत्वादिसं०

ग्रहणम् । रूपादीनां त्वेकैकेंद्रियेण । सत्तासामान्यस्य तु षडिन्द्रियग्राह्येष्वविशेषेण ग्रहणात् सर्वेंद्रियैर्ग्रहणम् । इन्द्रियेण संयुक्ते द्रव्ये समवेता ये संख्यादयस्तेषु समवायः सामान्यानां तस्मात् ॥ पुनः सबघट्टयात् ज्ञानोत्पत्तिं दर्शयति ।

श्रोत्रसमवायाच्छब्दग्रहणं[1], तदाश्रितसामान्यज्ञानं[2] समवेतसमवायात् ।

शब्दो गुणः । सामान्यवत्वास्पर्शवत्त्वे सति बाह्यैकेंद्रियग्राह्यत्वात्, कर्मव्यतिरिक्ते सति सामान्यवत्त्वे सति सामान्यवतामनाधारत्वाद्वा, रूपादिवदिति गुणत्वे सिद्धे, गुणत्वाच्चाश्रयवत्त्वे सति, य आश्रयः स पारिशेष्यादाकाशः । तथाहि शब्दः स्पर्शवतां गुणो न भवति । घ्राणरसनचक्षुस्त्वगिंद्रियैरग्राह्यत्वे सति अस्मदादिप्रत्यक्षत्वात्सुखादिवदिति । शब्द आत्ममनसोर्गुणो न भवति, अस्मदादिबाह्येंद्रियप्रत्यक्षत्वाद्रूपादिवत् । भूतात्ममनोऽतिरिक्तदिक्कालसद्भावेऽपि शब्दो दिक्कालगुणो न भवति, विशेषगुणत्वाद्, रूपादिवत् । अतः पारिशेष्याद्यः शब्दाश्रयः स आकाशः । स एव च श्रोत्रम् । तथाहि शब्दो गुणत्वावान्तरजात्या समानजातीयगुणवतेंद्रियेण गृह्यते, बाह्येंद्रियग्राह्यविशेषगुणत्वाद्रूपादिवत् । श्रोत्रं वा स्वग्राह्यविशेषगुणेनात्यन्तसजातीयगुणवद्, बाह्येंद्रियत्वाच्चक्षुरादिवत् । अतः श्रोत्रस्याकाशात्मकत्वात्तद्गुणस्य शब्दस्य तेन सह समवायः संबन्धः, इति स्थितम् । न चाकाशात्मकश्रोत्रसयुक्त एवाकाशान्तरे समवायाच्छब्दस्य ग्रहणमिति युक्तम् । ततो भेदे प्रमाणाभावात् । एव तीव्रादिभेदभिन्नास्तु शब्दास्तीव्रादिभेदभिन्नाभिघाताद्यन्वयव्यतिरेकानुविधायित्वान्नाश्रयभेदसाधकाः । अभेदे तु विवादाध्यासिताः शब्दाः श्रूयमाणशब्देनैकाश्रयाः, शब्दत्वाच्छ्रूयमाणशब्दासमवायिकारणशब्दवत् । असमवायिकारणशब्दः स्वकार्येणैकाश्रयः, अस्पर्शद्रव्यगुणविशेषस्यासमवायिकारणत्वादात्मान्तःकरणसंयोगवदित्यर्थः । तदाश्रितेति त शब्दमाश्रितानि

---

[1] ङ. reads श्रवणेनैव शब्दज्ञानम् । after श्रोत्रसमवायात् ।

[2] च. reads ग्रहणम् ।

तदाश्रितानि सामान्यानि सत्त्वशब्दत्ववर्णत्वादीनि तेषां ज्ञानम्। षष्ठसंबन्धाज्ज्ञानोत्पत्तिमाह।

एतत्पञ्चविधसंबन्धसंबद्धविशेषणविशेष्यभावाद् दृश्याभावसमवाययोर्ग्रहणम् ॥

एते च ते पञ्चविधा एतत्पञ्चविधाः। एतत्पञ्चविधाश्च ते सबन्धाश्चेतत्पञ्चविधसबन्धाः, सयोगः सयुक्तसमवायः सयुक्तसमवेतसमवायः समवायः समवेतसमवाय इति। एतैः सबन्धैः पञ्चविधैः समन्वये तैःसह विशेषणविशेष्यभावो नाम संबन्धः। तस्मादत्र सन्निधिविशेष एवेतरसबन्धवैलक्षण्यज्ञापनार्थं विशेषणविशेष्यभावशब्देनोक्तः। न पुनर्विशेषणविशेष्यभावो नाम कश्चित् संबन्धः। विशेषणविशेष्यभावयोः प्रतिनियताश्रयवृत्तित्वेन द्विष्टसबन्धरूपत्वानुपपत्तेः। तत्सत्त्वे किं प्रमाणमिति चेत्, घटशून्यं भूतलमित्यादिज्ञान विशेषणविशेष्यभावसबन्धानिबन्धन, विशिष्टप्रत्यक्षप्रत्ययत्वाद्दण्डीत्यादिप्रत्ययवत्। ग्रहणस्वरूपमाह।

तद्यथा, घटशून्य भूतलम्। इह भूतले घटो नास्तीति[२] ॥

इदमिन्द्रियसयुक्ते भूतले विशेषणतया विशेष्यतया चाभावस्य ग्रहण दर्शितम्।

एवं[३] सर्वत्रोदाहरणीयम् ॥

इन्द्रियसयुक्तसमवेतादौ विशेषणविशेष्यभावसबन्धेनाभावस्य ज्ञानमुदाहरणीयमित्यर्थः। तथाह्यशुक्ल कृष्णरूप, कृष्णरूपे शुक्लत्व नास्तीति सयुक्तसमवेते कृष्णरूपे शुक्लत्वाभावस्य ज्ञानम्। अभिन्न शुक्लत्वसामान्यं, शुक्लत्वसामान्ये भेदो नास्तीति सयुक्तसमवेतसमवेते शुक्लत्वसामान्ये विशेषणविशेष्यभावेन भेदधर्माभावस्य ज्ञानमिति। अकारः ककारो

---

१ च. Reads सबधसबन्धि

२ ङ adds तथाहि ततवः पटसमवायवतः ततुपु पटसमवाय इति.

३ ङ. reads इत्येव सर्वोद्य उदाहरणीयम्.

न भवति, अकारे ककारत्व नास्तीति श्रोत्रसमवेताकारे विशेषण-विशेष्यभावसंबन्धेन कत्वाभावज्ञानम् । अभिन्नमत्वम्, अत्वे भेदो नास्तीति श्रोत्रसमवेतसमवेतेऽत्वसामान्ये भेदधर्माभावज्ञानमिति । दृश्यस्य द्रष्टुयोग्यस्य घटादेरभावः । युक्त तस्य प्रत्यक्षत्व न पुनः पिशाचाद्यभावस्येत्यर्थः । नन्वेव सत्यभाववत्समवायेऽपि विशिष्टप्रत्ययदर्शनात्समवायिभिः सह संबन्धान्तरं स्यात्, ततस्तस्यापि संबन्धिभिः सह संबन्धान्तरमित्यनवस्थाप्रसग इत्याशंक्याह ।

समवायस्य तु क्वचिदेव ग्रहणं, यथेह घटे रूपसमवायः, रूप समवायी घट इति ।

क्वचिदेव शास्त्राभ्यासविपर्ययासितबुद्धौ समवायस्य विशेषणतया विशेष्यतया वा विषयत्व न पुनरभावबल्लौकिकबुद्धावपीत्यर्थः । न च प्राक्तनहेतो रूपसमवायी घट इति विशिष्टप्रत्ययत्वेन व्यभिचारः । प्रत्यक्षात्मकविशिष्टप्रत्ययत्वस्य हेतुत्वेनोपादानात् । न चाय प्रत्यक्षरूपः प्रत्यय इति । कथ तर्हि समवायस्य प्रत्यक्षत्वमिति चेद, अनुमितरूपानिर्विकल्पविषयत्वात् । तथाहि शुक्लः पट इत्यादिप्रत्यक्षप्रत्ययो ज्ञायमानसंबन्धपूर्वकः प्रत्यक्षविशिष्टप्रत्ययत्वात् दण्डीतिप्रत्ययवत् । अन्ये पुनरिम ग्रन्थमन्यथा योजयन्ति । समवायस्य तु क्वचिदेव सयुक्ते सयुक्तसमवेते समवेते च विशेषणविशेष्यभावेन ग्रहण न स्वभाववत्पञ्चविधसबन्धेष्वपीति, तदयुक्तम् । क्वचिदपि समवायस्य विशेषणतया विशेष्यतया वा प्रत्यक्षत्वानभ्युपगमात् । अभ्युपगमे हि, समवायस्यापि सबन्धान्तरप्रसङ्गः । तच्चानिष्टम् । विशेषण-विशेष्यभावात् दृश्याऽभावसमवाययोर्ग्रहणमिति ग्रन्थस्तर्हि कथमिति चेदुपचाराद्भेदव्यवहारः । तथाहि, रूपरूपिणोर्विशेषणविशेष्यभूतयोर्विशिष्टप्रत्ययहेतुत्वात् तत्समवायेऽपि विशेषणविशेष्यभाव इत्युच्यते । स्वविषयालोचनहेतुश्च स एवेति भेद उपचरितः । किमुक्त भवति । विशेषणविशेष्यभावसबन्धत्वात्समवायोऽपि निर्विकल्पत्वेन गृह्यत इति । न चेय यन्निर्विकल्पत्वेन गृह्यते तत्सविकल्पत्वेनापि ग्राह्यमिति व्याप्तिरस्ति, पथि गच्छतो गृह्यमाणतृणादिभिर्व्यभिचारात् । योगिप्रत्यक्ष लक्षयति ।

योगिप्रत्यक्षं तु देशकालस्वभावविप्रकृष्टार्थग्राहकम् ॥

देशेन विप्रकृष्टा दूरा मेर्वादयो, नागभुवनादयश्च कालेन विप्रकृष्टा रामादयः, स्वभावविप्रकृष्टा परमाण्वादयः, तेषा ग्राहकं तद्विषयसाक्षात्कारि सम्यगनुभवकारण यत्तद्योगिप्रत्यक्षम् ।

तद्विविधम्[१] ॥

युक्तावस्थायामयुक्तावस्थायां चेतिवाक्यमध्याहरणीयम् । अवस्थाद्वयेऽपि योगिप्रत्यक्षफलोत्पत्तिप्रकारमाह ।

तत्र युक्तावस्थायामात्मान्तकरणसंयोगादेव धर्मादिसाहितादशेषार्थग्रहणम् ॥

युक्तावस्थायां तु सकलबाह्येन्द्रियव्यापारविरमे केवलमनोविलोक्यमानतत्वात् । आत्मान्तःकरणसबन्धादेवेत्येवकारेण सयोग मनसः, अर्थसन्निकर्षं च निरस्यति, न पुनः कारणान्तर, धर्मादिसहितादित्यभिधानात् । धर्मश्चात्र योगाभ्यासप्रसादसमासादितो विशिष्टो निर्दिष्टः । आदिशब्दादीश्वरेच्छादेर्ग्रहणम् । अशेषार्थग्रहणमित्युपलक्षण, कतिपयातीन्द्रियार्थग्रहणस्यापि योगिप्रत्यक्षरूपत्वात् ।

अयुक्तावस्थायां तु चतुष्टयत्रयद्वयसन्निकर्षाद् ग्रहणम् ।

युक्तावस्थायां तु द्वयसन्निकर्षात्[२] ॥

युक्तावस्थाया समाध्यवस्थायाम् । तु शब्दः प्राक्तनज्ञानादस्य कारणाधिक्यलक्षणातिशयसूचने । सन्निकर्षशब्देन तु सयोगो विवक्षितः । तत्र घ्राणरसनचक्षुस्त्वगिन्द्रियैरर्थग्रहणे चतुर्णामात्मान्तःकरणबाह्येन्द्रियगन्धाद्याश्रयाणा सयोगः, यदा शब्दग्रहण तदात्ममनःश्रोत्राणां त्रयाणा सयोगः,

---

[१] ङ, च, ग. add after this युक्तावस्थाया वियुक्तावस्थायां चेति, च has अयुक्ता वस्थायां,

[२] ङ. च. ग. drop this line.

यदाऽवान्तरधर्मादीनां ग्रहणं तदात्ममनसोर्द्वयोः संयोगः कारणमिति । एतदेवाह ।

इति यथासंभवं योजनीयम् ॥

यद्यप्यस्मदादिचाक्षुषज्ञाने प्रकाशस्यापि पञ्चमस्य सयोगः कारण, तथापि योगिनां तदपेक्षाऽभावात्स नाभिहितः । आर्ष नाम प्रमाणान्तर केचिदाचक्षते तथा चोक्तम् ' प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणाविद्येति ' तन्निरस्यति ।

अत्रैवार्षमन्तर्भूतम् । प्रकृष्टधर्मजत्वाविशेषात् ॥

आर्ष प्रमाण, फलभूतस्य ज्ञानस्येति शेषः । अस्मदाद्यतीन्द्रियार्थविषयसाक्षात्कारिप्रमाविशिष्टादृष्टजनित योगिप्रत्यक्षफलमुच्यते । आर्षज्ञानमप्यतीद्रियेऽर्थे विशिष्टधर्मजनितम् । धर्मस्तु समाधिजनितो वास्तु, तपोविशेषजनितो वा, नैतावता प्रमाणभेद. । नन्वस्मदादिष्वपि क्वचिदार्ष ज्ञानं दृश्यते । तथा च कन्यका ब्रवीति, श्वो मे ज्यायानागन्ता हृदय मे कथयतीति । एतद्वचनानुमितभाविभ्रात्रागमनालम्बनस्य ज्ञानस्य सवादेन प्रामाण्यमप्यस्तीति । नैतदेवम् । काकरुतादिवत्कन्यकावचनस्य शकुनत्वेन लिङ्गत्वात् । अतो न कन्यकाया अतीन्द्रियार्थज्ञानसभवे प्रमाणमस्तीति । योगिप्रत्यक्षे चानेकागमवचनानि प्रमाणम । अनुमान चास्मदादिप्रत्यक्षज्ञानं सर्वविषयेणातीन्द्रियार्थविषयेण च केनचित्तज्ज्ञानेनात्यन्तसजातीयम्, प्रमाणजत्वाच्छब्दज्ञानवत् । न च सर्वविषयेण ज्ञानेनात्यन्तसजातीयत्वे साध्ये लैङ्गिकेन व्यभिचार', तस्यापि शाब्देनैव परोक्षत्वजात्यात्यन्तसजातीयत्वात् । न च तेनैव प्रकृतस्याप्यत्यन्तसजातीयत्वमस्तीति वाच्यम्, प्रकृतज्ञानस्य साक्षात्कारित्वेन विजातीयत्वात् । प्रत्यक्षमात्रस्य पुनरपि द्वैविध्यमाह ।

तच्च पुनर्द्विविधम् । सविकल्पकं निर्विकल्पकं च ॥

तच्छब्देन योगिप्रत्यक्ष परामृश्यते, चकारेणायोगिप्रत्यक्षमपि। द्वितीयस्तु चकार उक्तसमुच्चये । लक्षणमाह ।

---

१ ग. यथासभवेन. च. यथासभावन.

तत्र संज्ञादिसंबन्धोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकमिति ॥

संज्ञादीत्यादिशब्दाद्द्रव्यगुणकर्मसामान्याभावाः स्वीकृताः । संज्ञादीनां संबन्धः संज्ञासंबन्धः, तस्योल्लेखस्तद्विषयं ज्ञानं, तेन सहकारिणा सह विशिष्टज्ञानोत्पत्तौ निमित्तं कारणं यत्तत्सविकल्पकं प्रमाणम् । आवृत्त्याऽन्योऽप्यर्थः । संज्ञादिसंबन्धस्योल्लेखः प्रतिभासविषयत्वम्, तेन सहिता ज्ञानोत्पत्तिस्तस्या निमित्तं कारणं यत्तत्सविकल्पकमिति व्याख्येयम् । विशेषणं संज्ञादि, दण्डादे' पूर्वं ज्ञाने सति तत्सहकारिणेन्द्रियेण विशेषणविशेष्यविषयस्यैकस्य विशिष्टज्ञानस्योत्पत्तिः । अत एवाग्निमान्पर्वत इति ज्ञानमनुमानफलम् । व्याप्तिस्मरणकाले प्रतीतेनाग्निना विशिष्टस्य पर्वतस्यानुमेयत्वात् । अन्यथा निराधारस्याग्नेः कथमनुमेयत्वमिति । प्रमाणस्यातीन्द्रियत्वात्तत्फलमुदाहरति ।

देवदत्तोऽयं दण्डीत्यादि ॥

अत्र देवदत्त इति संज्ञासंबन्धोल्लेखि ज्ञानं, दण्डीति द्रव्यसंबन्धोल्लेखि ज्ञानम् । आदिशब्देन शुक्लः पट इति गुणोल्लेखि, गच्छति नर इति कर्मोल्लेखि, गौरश्च इति सामान्यशब्दोल्लेखि, घटरहितं गृहमित्यभावोल्लेखि ज्ञानं गृह्यते । अत्र विशेषणविशेष्ययोर्बाह्यैकेन्द्रियग्राह्ययोस्तु विशिष्टज्ञानं बाह्येन्द्रियजं, यथा दण्डी, शुक्लः पट इत्यादि । भिन्नेन्द्रियग्राह्ययोस्तु विशिष्टज्ञानं मानसमेव, यथा देवदत्तोऽयं, सुरभिकुसुममित्यादि । अन्ये तु सर्वस्यापि सविकल्पकज्ञानस्य संज्ञादिसंबन्धोल्लेखेनोत्पाद्यमानत्वात्, संज्ञादेश्च विशेषणत्वेन विशिष्टप्रत्ययालम्बनत्वाच्च तद्विषये चक्षुरादीनां व्यापारासंभवान्मानसो व्यापार इति मानसमेव सविकल्पकमित्याचक्षते । संज्ञायाश्च विशेषणत्वं व्यावर्तकत्वात्, यथैतेषु पुरुषेषु दण्डिनमाह्वयेति दण्डेन पुरुषः पुरुषान्तराद्व्यावर्तते तथैतेषु पुरुषेषु देवदत्तमाह्वयेति संज्ञयापि ।

वस्तुस्वरूपमात्रावभासकं निर्विकल्पकम् ॥

मात्रग्रहणेन संज्ञादिसंबन्धनिरासः । अवभासकमिति तद्विषयावभास-

१ ङ. स्वभाव.

कारणमित्यर्थः । अत्रापि प्रमाणस्यातीन्द्रियत्वात्तत्फलमेवाह ।

यथा प्रथमाक्षसन्निपातजं ज्ञानम् । युक्तावस्थायां योगिज्ञानं चेति ।

प्रथमाक्षसम्बन्धवेलायां सञ्ज्ञादिसम्बन्धस्मरणाभावात् तदनन्तरमुत्पद्यमानं ज्ञानं निर्विकल्पकमेवोच्यते । उत्पन्ने च तस्मिन्सङ्केतग्रहणकाले साहचर्येणानुभूतयोः शब्दार्थयोर्मध्येऽन्यतरस्यार्थस्य दृष्टत्वात्तत्संस्कारोद्बोधेन संज्ञया स्मरणस्योत्पादे च पश्चात्सविकल्पकं ज्ञानमित्यभ्युपगन्तव्यं युक्तमेव । अत एव हि निर्विकल्पकमित्यभ्युपगन्तव्यम् । तदभावे हि सञ्ज्ञास्मरणाभावे सविकल्पकाभावप्रसङ्गात्, तदभावेन भानादेश्चानुत्थानमिति । युक्तावस्थायां च समाध्यवस्थायां योगिज्ञानं निर्विकल्पकं, तस्यां दशायां पदार्थस्वरूपमात्रावलोकनात् । इतिशब्दः प्रत्यक्षलक्षणपरिसमाप्तिसूचकः ।

इति काश्मीरिकसूर्यसूनुवासुदेवविरचितायां न्यायसारपदपञ्चिकायां प्रत्यक्षलक्षणपरिच्छेदः समाप्तः ॥

द्वितीयः परिच्छेदः ।

ॐ श्रीगणेशायनमः । ॐ सकलप्रमाणज्येष्ठ प्रत्यक्ष लक्षयित्वेदानीमनुमान प्रपञ्चयति ।

सम्यगविनाभावेन परोक्षानुभवसाधनमनुमानम् ॥

सम्यक् इति भिन्नपद साधनविशेषणम् । इहाविनाभावविषय स्मरणमविनाभावः । उपचारात् । साधकतमार्थे तृतीया । अविनाभावविषयस्मरणेनासाधारणकारणेन जनितस्य परोक्षानुभवस्य यत्सम्यक्साधन लिंगज्ञानादिक तत्सर्वमनुमानमित्यर्थः । सम्यगित्यादिविशेषणानां प्रयोजन पूर्ववद् वाच्यम् । परोक्षग्रहण प्रत्यक्षव्यवच्छेदार्थम् । शब्दोऽपि परोक्षानुभवस्य साधनमिति तेनातिप्रसगः । तद्व्यवच्छेदार्थमविनाभावेनेतिपदम । शब्दस्य समयबलेनार्थप्रतीतिहेतुत्वात् । ननु तथापि अविनाभावग्रहणेनैव प्रत्यक्षस्यापि व्यवच्छिन्नत्वाद व्यर्थ परोक्षग्रहणमिति चेत्, सत्यम् । परोक्षत्वापरोक्षत्वजाती बाह्यविपयाश्रिते इति केषांचिद्दर्शन तन्निरासार्थमनुमानफलस्वरूपकथनार्थं चाऽनुभवविशेषणत्वेनोक्तमिति केचित् परिहरन्ति । वय तु ब्रूम. । वह्निधूमयोः सहचरितयोर्भूयोग्रहणे सति दहनाविनाभूतो धूम इति ज्ञानमपरोक्ष मानस जायते । ततस्तत्साधनमप्यनुभवसाधनमविनाभावेनानुमानमिति तद्व्युदासाय परोक्षग्रहणमिति । केनाप्यर्थेनाविनाभावः कस्यापि तात्त्विकसबधो नास्तीत्यतोऽनुमानलक्षण न सभवतीतिमत निरस्यति ।

स्वभावत· साध्येन साधनस्य व्याप्तिरविनाभाव ॥

प्रत्यक्षेण प्रतीयमानो निराकर्तु न शक्यत इति शेषः । तथाहि बालादयोऽपि धूम दृष्ट्वा वह्निं प्रतिपद्य तदर्थ प्रवर्तमाना दृश्यन्ते । न चान्यदर्शनेनान्यस्य प्रतीतिर्दहन विना धूमो नोपपद्यत इत्येवविधाऽविनाभावग्रहणमन्तरेण सभवति । साध्येन साधनस्य व्याप्तिरिति यदिद साध्यस्य वह्न्यादेर्व्यापकत्व साधनस्य च धूमादेर्व्याप्यत्व यत्र यत्र धूमस्तत्र तत्राग्निरग्न्यभावे तु न क्वचिद्दृष्टो धूम इति सोऽविनाभाव इत्यर्थः । तथाहि शब्दनित्यत्वे साध्ये

पक्षसपक्षयोरन्यतरत्वादीनां कल्पिता व्याप्तिरस्ति । न चासावविनाभाव इति तद्व्यवच्छेदार्थमाह स्वभावत इति । अकल्पनयेत्यर्थः । पक्षसपक्षयोरन्यतरत्वादीना तु शब्दनित्यत्वे न स्वाभाविकी व्याप्तिरस्ति । अनियतसाध्यवृत्तित्वात् । यथाहि नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात्, आकाशवदिति प्रयोगस्तद्वदनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वाद् घटवदित्यपि सभवत्येव । न च स्वाभाविकाविनाभावो धूमो धूमध्वजमिव तदभावमपि साधयतीति युक्तम् ।

द्विष्ठ (?) भेदमाह ।

स द्विविध. । अन्वयव्यतिरेकभेदात् ॥

अन्ये तु विना केनचित्कस्यचिदभावो ह्यविनाभाव इत्यविनाभावशब्दार्थं पश्यन्तो व्यतिरेकरूपमेवाविनाभाव मन्यन्ते । तदयुक्तम् । न हि व्युत्पत्तिरेव शब्दार्थं व्यवस्थापयति, अपि तु लौकिकप्रसिद्धिरपि । सा चाविनाभावस्योभयरूपत्वेऽप्यस्ति । व्युत्पत्तिमात्रनिमित्तत्वे तिष्ठन् गौर्गौर्न स्याद् गच्छतीति गौरिति व्युत्पत्तेः ।

उभयरूपस्यास्य लक्षणमाह ।

साध्यसामान्येन साधनसामान्यस्य व्याप्तिरन्वयः । साधनसामान्याभावेन तु साध्यसामान्याभावस्य व्याप्तिर्व्यतिरेकः ।

साध्यमेवाविवक्षितावान्तरविशेषं सामान्य साध्यसामान्य तार्णत्वपार्णत्वमाहानसादिविशेषविवक्षाशून्यमग्निमात्रमित्यर्थः। तेन कर्तृभूतेन साधनमेवाविवक्षितावातरविशेष सामान्य साधनसामान्य तस्य कर्मभूतस्य व्याप्तिः साहचर्य यत् सोऽन्वयः । यो यो विशिष्टधूमः स स मूल एव प्रदेशे वह्निमान् यो यो धूमवान्भूप्रदेशः स स वह्निमानिति व्याप्तिः सोऽन्वयः । एतेन

विशेषेऽनुगमाभावात्सामान्ये सिद्धसाधनात्

तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः ॥

इति दूषण प्रत्युक्तम्, अवांतरविशेषेणान्वयाभिधानात् । सामान्ये सिद्धसाधनादित्यपि निरस्तम् । न हि यत्रकुचिदग्निरस्तीति साध्यते । किं तर्हि यत्र पर्वतादौ धूमोपलब्धिस्तत्र मूलप्रदेशे वह्निरिति प्रदेशस्यापि

सामान्याकारेणाविनाभावग्रहणमुपदर्शितमेव । अथवा द्वयमनुमानाङ्गं व्याप्तिः पक्षधर्मता चेति । तत्र व्याप्त्याऽग्निसत्त्वसिद्धिः पक्षधर्मताबलाच्च नियतधर्मिसबन्धलक्षणविशेषसिद्धिरित्यलम् । तथा साधनमेव सामान्यं साधनसामान्यं तस्याभावेन साध्यमेव सामान्यं तस्याभावः साध्यसामान्याभावस्तस्य व्याप्तिः साहचर्यं यत्स व्यतिरेकः । यत्र साध्यस्याग्न्यादेरभावस्तत्र साधनस्य धूमादेरप्यभाव इति यः साध्याभावसाधनाभावयोर्व्याप्यव्यापकभावः स व्यतिरेक इत्यर्थः ।

साधनं लिङ्गम् ॥

इति पर्यायतो लक्षणम् ।

तद्विविधं । दृष्टं सामान्यतो दृष्टं च ॥

भेदनिरूपणे च शब्दः स्वार्थपरार्थभेदेन द्वैविध्यसूचने । तत्र दृष्टादृष्टविषयत्वात्साधनमपि दृष्टमुच्यते । साध्य च क्वचित्पूर्वदृष्टमप्यनुमीयते यथा कुड्यादिव्यवहितस्वपित्रादिध्वानिलिङ्गेन । क्वचित्पूर्वमदृष्टोऽप्यनुमीयमानो दहनादिः दृष्टसजातीयत्वाद् द्रष्टुं शक्यत्वाद्वा दृष्ट इत्युच्यते । अतस्तद्विषयमपि साधनं दृष्टमेव । अथोभयस्यापि साधनस्य लक्षणमाह ।

तत्र प्रत्यक्षयोग्यार्थानुमापकं दृष्टम् । यथा धूमोऽग्नेरिति । स्वभावविप्रकृष्टार्थानुमापकं सामान्यतो दृष्टम् । यथा रूपादिज्ञानं चक्षुरादेः ॥

प्रत्यक्षप्रमाणस्य योग्यः प्रत्यक्षयोग्यः । स चासावर्थश्च प्रत्यक्षयोग्यार्थः । तस्यानुमापकमिति करणस्यापि कर्तृतोपचारादत्र ण्वुल्प्रत्ययः । प्रत्यक्षयोग्यत्वं च पूर्वं दृष्टत्वेनास्मदादिभिर्द्रष्टुं शक्यत्वेन वा । स्वभावेन च स्वरूपेण विप्रकृष्टार्था अस्मदादिप्रत्यक्षायोग्याः परमाण्वादयः । तेषामनुमापकं लिङ्गं सामान्यतो दृष्टमित्युच्यते । व्याप्तिग्रहणवेलायां सामान्यतो दृष्टार्थस्यानुमापकत्वात् । यद्यपि सर्वमनुमानं सामान्यतो गृहीतव्याप्तिकार्थविषयं तथापि दहनाद्यनुमानं येन सामान्येन व्यपदिश्यते तस्य प्रत्यक्षविषयत्वात् तद्विषयमनुमानं दृष्टमित्युच्यते । न चैवं चक्षुराद्यनुमानं येन सामान्येन नयनत्वादिना व्यप-

दिश्यते तस्य प्रत्यक्षत्वमिति । तथाहि क्रिया कारणपूर्विकेति सामान्यव्याप्तिबलात् प्रवर्तमानत्वात्सामान्यतो दृष्टमित्युच्यते ।

तत्पुनर्द्विविधम् । स्वार्थं परार्थं चेति । तत्र परोपदेशानपेक्षं स्वार्थम् । परोपदेशापेक्षं परार्थम् ॥

पर उपदिश्यते येन पदसमूहेनासौ परोपदेशः । तस्य स्वरूपमाह ।

परोपदेशस्तु पञ्चावयवं वाक्यम् ॥

तुशब्दो ह्यवयवत्र्यवयवादि परपक्षनिरासे । पदकदम्बात्मकत्वाद वाक्यस्य तदवयवा. पञ्च किं पदान्येव । नेत्याह ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥

वाक्यात्मका अपि प्रतिज्ञादयो महावाक्यापेक्षयावयवाः । यथावयविनः पादादय' कायापेक्षयावयवा उच्यन्ते तद्वदित्यर्थः । आद्यावयवस्य लक्षणमाह ।

तत्र प्रतिपिपादयिषया पक्षवचनं प्रतिज्ञा । यथाऽनित्यः[१] शब्द इति ॥

तत्र तेष्ववयवेषु मध्ये साध्यधर्मविशिष्टो धर्मी पक्ष इति वक्ष्यति तस्य पक्षस्य वचन हेत्वाद्यवयवशून्य यथाऽनित्यः शब्द इति । केवल पक्षवचन प्रतिज्ञा मा भूदित्येतदर्थमुक्त प्रतिपिपादयिषयेति पदम् । पर प्रति प्रमाणेन सिसाधयिषयेत्यर्थः । न च प्रतिज्ञा निरर्थिका, तदभावे हेत्वादिविषयापरिज्ञानात् । केवलहेत्वभिधायिनोऽप्रस्तुताभिधायित्वसङ्गात् ।

शक्तस्य सूचक हेतुवचोऽशक्तमपि स्वयम् ।
साध्याभिधानात्पक्षोक्तिः पारपर्येण नाप्यलम् ॥

इति वदता बौद्धेन स्वप्रवृत्ति' स्ववचनेन विडम्बिता । पक्षोक्तिः

---

१ ङ. reads यथा शब्दोऽनित्यः । च. has यथा नित्यः शब्द इति.

पारंपर्येण नाप्यलमित्यस्य वचनस्य प्रतिज्ञारूपत्वात् । द्वितीयावयवस्य लक्षणमाह ।

साधनत्वरूयापकं लिङ्गवचनं हेतुः । यथा तीव्रादिधर्मोपेतत्वादिति॥

लिङ्गवचन हेतुरित्युच्यमाने यो यो धूमवानित्यादिवचनास्यपि हेतुत्व-प्रसंगस्तन्निवृत्त्यर्थं साधनत्वख्यापकमिति विशेषणम् । धूमवत्त्वाद्धूमवत्त्वेन वा सधूमो यस्माद्भवतीत्यादिवचनमेव हेतुरित्यर्थः । भेदमाह ।

स त्रिविधः । अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरेकी चेति॥

चकारः कारणानुमान कार्यानुमान अकार्यकारणानुमानमिति सूत्रोक्त-त्रैविध्यसूचने । अत्र लिङ्गस्यान्वयव्यतिरेक्यादिरूपेण त्रैविध्यात्तद्वाचकः शब्द रूपो हेतुरपि तथोक्त उपचारात् । उपचारे च प्रयोजन लिङ्गस्य दृष्टत्वे हेतु रपि दृष्टो भवत्यदृष्टत्वे चादृष्टत्वमिति ज्ञापनम् । आद्य हेतु लक्षयति ।

तत्र पञ्चरूपोऽन्वयव्यतिरेकी । रूपाणि तु प्रदर्श्यन्ते । पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद् व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति ॥

तत्र तेषु त्रिविधेषु हेतुषु पञ्चरूपाणि यस्यासौ पञ्चरूपो हेतुरित्यत्राप्युपचारः। तु शब्दस्त्रिरूप एव हेतुरिति मतस्य निरासे । अबाधितः प्रमाणाविरुद्धो विषयः साध्योऽर्थो यस्यासावबाधितविषयस्तस्य भावस्तत्त्वम् । असन् प्रतिपक्षः साध्यत्वेन यस्यासावसत्प्रतिपक्षस्तस्य भावस्तत्त्वम् । पञ्च रूपाणि व्याचष्टे ।

तत्र साध्यधर्मविशिष्टो धर्मी[3] पक्ष । तत्र व्याप्यवृत्तित्वं हेतोः पक्षधर्मत्वम् ॥

तेन व्याप्यपक्षे वृत्तिर्यस्यासौ व्याप्यवृत्तिस्तस्य भावो व्याप्यवृत्तित्व पक्ष-धर्मत्वमुच्यते । न पुनः पक्षैकदेशवृत्तित्वमित्यर्थः ।

---

१ ङ. omits this.

२ ग. घ. ङ. drop प्रदर्श्यन्ते ।

३ ङ. drops धर्मी ।

साध्यसमानधर्मा धर्मी सपक्षः । तत्र सर्वस्मिन्नेकदेशे वा हेतोर्वृत्तिः[१] सपक्षे सत्त्वम् ॥

समानो धर्मो यस्यासौ समानधर्मा । धर्मादनिच् केवलात् (पा. ५।४।१२४) इति बहुव्रीहौ धर्मशब्दादनिच् । साध्येन समानधर्मा साध्यसमानधर्मेति पश्चात्तत्पुरुषः ।

साध्यव्यावृत्तधर्मा धर्मी विपक्षः । तत्र सर्वस्मिन् विपक्षे हेतोरवृत्तिर्विपक्षाद् व्यावृत्तिः ॥

साध्याद् व्यावृत्तः साध्यव्यावृत्तः। स एव धर्मो यस्यासौ साध्यव्यावृत्तधर्मा साध्यशून्य इत्यर्थः । धर्मीति पदेन

तस्माद् वैधर्म्यदृष्टान्ते नेष्टो धर्मी समाश्रयः ।
तदभावे च तन्नेति वचनादेव तद्गतिः ॥

इति बौद्धमतं निरस्यति । न हि धर्मिणमन्तरेण वचनमात्राद् व्यतिरेकप्रतीतिर्भवितुमर्हति । धूमे सति वह्निरवश्यमस्तीति वचनमात्रादेवान्वयसिद्धौ साधर्म्यदृष्टान्तेऽपि धर्मिणो वैयर्थ्यप्रसङ्गात् । यद्यपि हेतुरूपाभिधानप्रस्तावादेव हेतोरिति लभ्यते तथापि स्पष्टार्थं पुनरभिधानम् ।

प्रमाणाऽविरोधिनि प्रतिज्ञातेऽर्थे हेतोर्वृत्तिरबाधितविषयत्वम् ॥

प्रमाणेन प्रत्यक्षादिनाऽविरोधः प्रमाणाऽविरोधः स विद्यते यस्यासौ प्रमाणाविरोधी तस्मिन् प्रतिज्ञाते नित्यत्वादिधर्मके शब्दादौ वृत्तिः । हेतोरित्यधिकारात् प्रस्तावाच्च लभ्यते ।

साध्यतद्विपरीतयोः साधनस्याऽत्रिरूपत्वमसत्प्रतिपक्षत्वम् ॥

साध्य शब्दानित्यत्वादि तद्विपरीतं शब्दनित्यत्वादि तयोरुभयोरपि साध्यमानयोः सतोः साधनस्य कार्यत्वादेरत्रिरूपत्व पक्षधर्मत्वसपक्षेसत्त्वविपक्षाद्-

१ क drops हेतोः ।

२ क drops हेतोः ।

व्यावृत्तिलक्षणरूपरहितत्वम । किन्त्वेकस्मिन् साध्य एव त्रिरूपत्वमिति भावः । अन्वयव्यतिरेकिणोऽवान्तरभेद सोदाहरणमाह ।

स द्विविधः । सपक्षैकदेशवृत्तिभेदात् ॥

सपक्षे सर्वस्मिन्नेकदेशे वा या वृत्तिस्तस्या भेदात् ।

तद्यथाऽनित्यः शब्दः कार्यत्वादिति सपक्षव्यापकः ॥

नन्वनित्यत्वं नाम विनाशित्व तस्मिन् साध्ये प्रागभावोऽपि सपक्षः । न च तत्र कार्यत्वमस्ति । अतः कथमय सपक्षव्यापको हेतु' । नैष दोषः । विनाशी खल्वनित्य उच्यते विनाशश्चाभावः । न च प्रागभावस्याभावान्तरमस्ति । भावोत्पादेनैव प्रागभावो नष्ट इति व्यवहारोपपत्तेर्भावाभावयोः सहानवस्थान लक्षणो विरोध इति । अन्ये त्वनित्यत्व नाम वस्तुत्वे सति विनाशित्वम । अस्मिंश्च साध्ये न प्रागभावस्य सपक्षत्वमिति परिहरन्ति । ननु तथापि कार्यत्व नाम प्रागसतः पश्चादात्मलाभो विधीयते तच्चानित्यत्वशून्ये प्रध्वसाभावेऽप्यस्तीति चेत् सत्यम्, सामान्यवत्त्वे सतीतिवक्ष्यमाणविशेषणस्यात्र स्मरणाददूषणमेतत् । अथवा स्वकारणसमवायित्व कार्यत्व, तच्च प्रध्वसे नास्ति ।

सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वादिति सपक्षैकदेशवृत्तिः ॥

इन्द्रियग्राह्यत्वादनित्यः शब्द इत्युक्ते मनोग्राह्येणात्मना नित्येन व्यभिचार इति तन्निवृत्त्यर्थं बाह्यग्रहणम । तथापि परमाणूना योगिबाह्येन्द्रियग्राह्यत्वमस्ति, न चात्रानित्यत्व तन्निरासायास्मदादिग्रहणम । सत्तासामान्ये व्यभिचारस्तन्निरासाय सामान्यवत्त्वे सतीति विशेषणम् । अत्र सकलशब्दपक्षीकारेऽपि बाह्येन्द्रियग्राह्यत्व नाम ग्रहणयोग्यत्व विवक्षित, तच्च सर्वशब्दानामस्ति । ब्रह्म भाषितानां तु दूरत्वेन श्रोत्रसबधाभावादग्रहण न पुनरयोग्यत्वादतो न सप क्षैकदेशवृत्तिरय हेतुः किंतु सुखादावनित्येऽपि सपक्षे न वर्तत इति सपक्षैकदेशवृत्तिः । केवलान्वयिनो लक्षणमाह ।

---

१ ग. ङ च. read सपक्षवृत्तिभेदात् ।

पक्षव्यापकः सपक्षवृत्तिरविद्यमानविपक्षः केवलान्वयी ॥

अबाधितविषयत्वे च असत्प्रतिपक्षत्वे च सतीति विशेषणमत्रोत्तरलक्षणवाक्ये चार्थाल्लभ्यत इति सग्रहेणोक्तम् ।

स च पूर्ववद् द्विविधः ॥

सपक्षव्यापकसपक्षैकदेशवृत्तिभेदाद् द्विविध इत्यर्थः । उभयोरप्युदाहरणमाह ।

तद्यथा विवादास्पदीभूतान्यदृष्टादीनि कस्याचित्प्रत्यक्षाणि प्रमेयत्वात्करतलामलकवत्[1] । सैव प्रतिज्ञा मीमांसकानामप्रत्यक्षत्वादस्मत्स्वादिवदिति ॥

अत्राद्यो हेतुः सपक्षव्यापकः । द्वितीयस्तुसपक्षैकदेशवृत्तिः । घटादावभावात् । ननु मीमासकानामप्रत्यक्षत्व नाम विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वान्मीमासकव्यतिरिक्तपुरुषप्रत्यक्षत्व यदि हेतुस्तदा साध्यहेतुत्वेऽविशिष्टे, अथ निषेधमात्र हेतुस्तदा शशविषाणादिना व्यभिचारः । तत्र मीमासकानामप्रत्यक्षत्वसभवेऽपि कस्यचित् प्रत्यक्षत्वाभावादिति चेन्नैवम । मीमांसकानां प्रत्यक्षातिरिक्तप्रमाणग्राह्यत्वस्य हेतुत्वेन विवक्षितत्वात् । केवलान्वयी प्रमाण अबाधितविषयत्वासत्प्रतिपक्षत्वपक्षव्यापकत्वे सति सपक्ष एव सत्वात्, अन्वयव्यतिरेकिवत् । केवलव्यतिरेकिणो लक्षणमाह ।

पक्षव्यापकोऽविद्यमानसपक्षो विपक्षाद्व्यावृत्त केवलव्यतिरेकी[4]॥

तस्योदाहरणमाह ।

यथा सर्ववित्कर्तृक सर्वं कार्यं कादाचित्कत्वात् । यत्[5] सर्ववित्कर्तृपूर्वकं न भवति तत् कादाचित्कमपि न भवति । यथाकाशम् ॥

---

१ ग. घ ङ reads करतलादिवत् ।

२ घ. ङ add इति सपक्षव्यापकः ।

३ ग. ङ. च. add सपक्षैकदेशवृत्तिः ।

४ ङ. adds स चाप्रसङ्गोन्नेयी प्रसङ्गोन्नेयी च;

५ ङ. drops this sentence.

न चाप्रसिद्धविशेषणः पक्ष इति दूषणं, सर्वविदादिपदार्थानां प्रसिद्धत्वात् । पदार्थान्वयरूपवाक्यार्थस्याप्रसिद्धत्वादप्रसिद्धः पक्ष इति चेत् तर्हि पर्वतो वह्निमानिति वाक्यार्थस्यानुमानात्पूर्वमप्रसिद्धत्वादप्रसिद्धविशेषणत्वेन धूमानुमानस्याप्यप्रामाण्यप्रसङ्गः । नन्वेवं शशविषाणपूर्वकत्वमपि साध्यधर्मः स्यात् । सर्वं कार्यं शशविषाणपूर्वकं कादाचित्कत्वादिति तन्न । विपक्षे बाधकप्रमाणसहितस्य केवलव्यतिरेकिणः प्रमाणत्वाभ्युपगमात् सर्ववित्कर्तृपूर्वकत्वाभावे हि कार्यत्वमेव न स्यात् । तथाहि कार्यवैचित्र्यात् कारणवैचित्र्यमनुमीयते । कारणानां च दृष्टानां जलभूमिबीजादीनां क्वचिदवैचित्र्येऽपि कार्यस्य फलस्य वैचित्र्योपलम्भाद् विचित्रमदृष्टरूपं कारणं सिध्यतीति सर्वस्यापि कार्यरूपस्यादृष्टपूर्वकत्वं सिद्धम् । तच्चादृष्टरूपं कारणमचेतनत्वाच्चेतनानधिष्ठितं दण्डादिवत्स्वकार्ये न व्याप्रियते । न च तदजानन्नस्मदादिस्तत्प्रेरयतीति युक्तम् । अतोऽदृष्टादिकारणविषयविशिष्टज्ञानवानेव कर्ता भवितुमर्हतीति तर्कसहितमेवेदं प्रमाणम् । शशविषाणपूर्वकत्वाभावे च विपक्षे न किंचिद्बाधकमस्ति । तथाहि शशविषाणं नाम यदि शून्यमेव तदा कथं कारणं स्यात् । अथातुच्छं सकलकार्यकारणभूतादृष्टाद्यभिज्ञं तत्प्रेरकं वाऽङ्गीक्रियते तदा सञ्ज्ञाभेदमात्रं स्यादिति । केवलव्यतिरेकिण उदाहरणान्तरमाह ।

प्रसंगद्वारेण वा यथा नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसंगाल्लोष्ठादिवदिति ॥

प्रसङ्गशब्द एव द्वारमुपायः प्रसङ्गद्वारं तेन प्रसङ्गशब्दोच्चारणेनेत्यर्थः । केवलव्यतिरेकी प्रमाणमबाधितविषयत्वाऽसत्प्रतिपक्षत्वे पक्षव्यापकत्वे च सति विपक्षादेव सर्वस्माद् व्यावर्तमानत्वादन्वयव्यतिरेकिवत् । इदानीमनुमानपरिशुद्धावन्यत्रोपयोगिनां हेत्वाभासानां स्वरूपं निरूपयितुकामस्तेषां प्रसङ्गं तावद्दर्शयति ।

एतेन हेत्वाभासानामहेतुत्वमुक्तं भवति ॥

एतेन हेतुस्वरूपवर्णनेन तदाभासानामहेतुत्वमुक्तं भवति हेतुलक्षणरहितत्वादिति भावः । तल्लक्षणमाह ।

हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासा इति[२] ॥

सम्यग्घेतुरपि कस्यचिदज्ञस्याहेतुवदवभासते न पुनर्हेतुरेवेति । न चासौ हेत्वाभास इति तन्निरासायोक्तं हेतुलक्षणरहिता इति । हेतुलक्षणरहिता घटादयो भवन्ति न च ते हेत्वाभासाः । अत उभयं समिलितं हेतुलक्षणम् । हेतुलक्षणरहितानामपि हेतुवदवभासमानत्वं पक्षधर्माद्यन्यतमवत्वेन विभजते ।

असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः ॥

तेषां क्रमेण लक्षणमाह ।

तत्रानिश्चितपक्षवृत्तिरसिद्धः ॥

अनिश्चिता सन्दिग्धा नास्तीति निश्चिता वा पक्षे वृत्तिर्यस्यासावनिश्चितपक्षवृत्तिः ।

पक्षविपक्षयोरेव वर्तमानो[३] विरुद्धः ॥

न सपक्षे इति भावः । साध्यं विरुणद्धीति विरुद्धः ।

पक्षसपक्षविपक्षवृत्तिरनैकान्तिकः ॥

एकस्मिन्नर्थे साध्ये न नियतो न चैकान्तिकोऽनैकान्तिकः । न त्वनेनाश्रयासिद्धोऽनूक्तः ।

साध्यासाधकः पक्ष एव वर्तमानो हेतुरनध्यवसितः ॥

पक्ष एव वर्तमानः केवलव्यतिरेक्यपि भवति । न चासौ हेत्वाभास इत्यतस्तदव्यवच्छेदार्थं साध्यासाधक इति पदम् ।

प्रमाणबाधिते पक्षे वर्तमानो हेतुः कालात्ययापदिष्टः ॥

कालस्यात्ययोऽतिक्रमस्तस्मिन्नपदिष्ट उक्तः कालात्ययापदिष्टः । सन्देहयोग्यपक्षोपन्यासानन्तरं हेतूपन्यासस्य कालः । प्रमाणान्तरेण सन्देहयोग्यतानिश्चये विपरीतनिश्चये च सन्देहो नास्तीत्यर्थः ।

---

१ ङ has हेतुत्वलक्षण०

२ ग. adds ते चानेकप्रकारा

३ क and च add हेतु. ।

स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः ॥

प्रकरणयोः पक्षप्रतिपक्षयोः साधने समः प्रकरणसमः पक्षधर्मत्व सपक्षे सत्व विपक्षाद्व्यावृत्तिरिति त्रिरूपत्वेन । अथैषामवान्तरभेद सोदाहरण प्रपञ्चयितुकामोऽशक्यत्व तावन्निरस्यति ।

यद्यप्येषां सूक्ष्मा भेदा अनन्तत्वान्न शक्यन्ते वक्तुं तथापि स्थूलां दृष्टिमाश्रित्य कियन्तो भेदा लक्षणोदाहरणाभ्यां[1] प्रदर्श्यन्ते ॥

शिष्यव्युत्पत्त्यर्थमिति शेष.। दृश्यते इति दृष्टिः । आद्य हेत्वाभास प्रपञ्चयति ।

असिद्धभेदास्तावत् । स्वरूपासिद्धो यथा अनित्य. शब्दश्चाक्षुषत्वादिति ॥

स्वरूपेणासिद्धः स्वरूपासिद्ध.। स्वरूपमसिद्ध वा यस्यासौ स्वरूपासिद्धः। यद्यपि चाक्षुपत्व स्वरूपेण रूपादावस्ति तथापि शब्दे धर्मिणि निर्दिष्टं चाक्षुषत्व नास्तीति स्वरूपासिद्ध न तु व्यधिकरणासिद्धम् ।

व्यधिकरणासिद्धो यथाऽनित्यः शब्दः पटस्य[2] कृतकत्वादिति ॥

पक्षविलक्षणमधिकरण यस्यासौ व्यधिकरणः स चासावसिद्धश्चेति विग्रहः।

विशेष्यासिद्धो यथाऽनित्य शब्दः सामान्यवत्वे सति चाक्षुषत्वादिति ॥

विशेष्य चाक्षुपत्वमसिद्ध यत्र हेत्वाभासे सोऽय विशेष्यासिद्धः ।

विशेषणासिद्धो यथाऽनित्यः शब्दश्चाक्षुषत्वे सति सामान्यवत्वादिति ॥

चाक्षुपत्व नित्ये गोत्वादावस्तीति तद्व्यवच्छेदार्थमुभयत्रापि सामान्यवत्त्वग्रहणम् ।

---

१ ग. घ. ङ. च. drop लक्षणोदाहरणाभ्याम् ।

२ ग. घ. च. घटस्य ।

भागासिद्धो यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् ॥

यद्यपि वायवीयादिशब्दानामीश्वरप्रयत्नपूर्वकत्वमस्ति तथापि प्रयत्नमन्दतीव्रादिभावानुविधायित्वलक्षणं प्रयत्नानन्तरीयकत्वमत्र विवक्षितम् । तच्च वायवीयादिशब्दे नास्तीति भागासिद्धत्वम् ।

आश्रयासिद्धो यथाऽस्ति प्रधानं विश्वपरिणामित्वादिति ॥

आश्रयस्य प्रधानस्यासिद्धत्वात् सिद्धत्वानुमानवैयर्थ्यमिति भावः ।

आश्रयैकदेशासिद्धो यथा नित्याः प्रधानपुरुषेश्वरा अकृतकत्वादिति ॥

पक्षीकृताना मध्यात् प्रधानस्यैकदेशस्यासिद्धत्वात् ।

व्यर्थविशेष्यासिद्धो यथाऽनित्यः शब्दः कृतकत्वे सति सामान्यवत्त्वादिति । व्यर्थविशेषणासिद्धो यथाऽनित्यः शब्दः सामान्यवत्त्वे सति कृतकत्वादिति ॥

व्यर्थं विशेष्यं यस्मिन् हेत्वाभासेऽसौ व्यर्थविशेष्यः । व्यर्थविशेष्यश्चासावसिद्धश्चेति व्यर्थविशेष्यासिद्धः । एवमितरत्रापि । प्रागसतः सत्तासबन्धः कृतकत्वम् । तच्च प्रध्वंसे नास्तीति व्यभिचारात्तत्र सामान्यवत्त्वं व्यर्थमित्यर्थः । असिद्धत्वं हेतोः कृतकत्वस्य मीमांसकाभिप्रायेण ।

संदिग्धासिद्धो यथा धूमबाष्पादिविवेकानिश्चये कश्चिदाहाऽग्निमानयं प्रदेशो धूमवत्त्वादिति ॥

बाष्पादीत्यादिशब्देन मशकवर्तिस्वीकारः ।

संदिग्धविशेष्यासिद्धो यथाऽद्यापि[२] रागादियुक्तः कपिलः पुरुषत्वे सत्यद्याप्यनुत्पन्नतत्त्वज्ञानत्वादिति । संदिग्धविशेषणासिद्धो यथाऽ

---

१ ङ. has विभागासिद्धो ।

२ च. drops अद्यापि । घ. reads सति सर्वदानुत्पन्न० ।

व्यापि रागादियुक्तः कपिलः सर्वदा तत्त्वज्ञानरहितत्वे सति पुरुषत्वा दिति[1] ॥

कपिलस्यापि कदाचिद्रागादियोगोऽस्तीति सिद्धसाधनता स्यादतस्तत्परिहार प्रतिज्ञायामव्यापीति पदम् । अनुत्पन्नतत्त्वज्ञानत्वादित्युक्ते महायोगिभिर्व्य- भिचारः । तेषां कदाचिदनुत्पन्नतत्त्वज्ञानत्वेऽप्यव्यापि रागादियोगाभावात् । अतोऽव्यापीति सर्वदेति च हेतुविशेषणं कृतम् । पाषाणादिना व्यभिचार- परिहारार्थं पुरुषत्वे सतीति विशेषणम् । ननूभयथासिद्धान्यतरासिद्धप्रकारे- णापि कस्मादसिद्धभेदौ नोदाहृतावित्याशङ्क्याह ।

त एतेऽसिद्धभेदा यदोभयवाद्यसिद्धत्वेन विवक्षितास्तदोभयवाद्य- सिद्धा भवन्ति । यदा त्वन्यतरवाद्यसिद्धत्वेन विवक्षितास्तदाऽन्यतरवाद्य- सिद्धा भवन्ति[2] ॥

विरुद्धभेदास्तु । सति सपक्षे चत्वारो विरुद्धभेदाः । पक्षविपक्ष- व्यापको यथा नित्यः शब्दः कार्यत्वात् ॥

उभयान्तोपलक्षितस्य सत्त्वमनित्यत्वम् । न पुनर्विनाशित्वम् । तद्विपरीतं नित्यत्वमतः प्रागभावप्रध्वंसाभावयोरपि नित्यत्वात्सपक्षत्वम् । स्वकारणसम- वायस्तु कार्यत्वम् । तच्च प्रागभावादिषु नास्तीति विरुद्धत्वम् । यदि पुन- रादिमत्त्वं कार्यत्वमिष्यते तदा प्रध्वंसेऽपि गतत्वादनैकान्तिकस्यापि विरुद्ध- त्वमिति ।

विपक्षैकदेशवृत्तिः पक्षव्यापको यथा नित्यः शब्दः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात्[3] ॥

---

१ घ and च. add विरुद्धविशेष्यासिद्धो यथाऽनित्यः शब्दः, अमूर्तत्वे सति अकृतकत्वात् । विरुद्धविशेषणासिद्धो यथाऽनित्यः शब्दः अकृतकत्वे सति अमूर्तत्वात् ।

२ and ग. ङ. read तदोभयासिद्धा भवन्ति.

३ ग. घ. ङ. omit बाह्य.

योगिना परमाणवोऽपि बाह्येन्द्रियग्राह्यास्ततः सपक्षवृत्तित्वान्न विरुद्धत्व स्यादित्यस्मदादिग्रहणम् । तथापि सामान्ये नित्येऽप्यस्तीति सामान्यवत्त्वे सतीतिपदम् । ग्राह्यत्व ग्रहणयोग्यत्व विवक्षितम् । तच्च सर्वशब्देऽप्यस्तीति पक्षव्यापकत्वम् ।

पक्षविपक्षैकदेशवृत्तिर्यथा नित्यः शब्दः प्रयत्नानन्तरीयकत्वात् ॥

प्रयत्नतारतम्यानुविधायित्व प्रयत्नानन्तरीयकत्वम् । तद्वाय्वादिशब्दे नास्तीति पक्षविपक्षैकदेशवृत्तिरिति ।

पक्षैकदेशवृत्तिर्विपक्षव्यापको यथा नित्या पृथिवी कृतकत्वात् ॥

व्याख्यातप्रायमेतत् ।

असति सपक्षे चत्वारो विरुद्धाः । पक्षविपक्षव्यापको यथाऽऽकाशविशेषगुणः शब्दः प्रमेयत्वात् ॥

आकाशविशेषगुणत्व साध्यं शब्दव्यतिरेकेणान्यत्र नास्तीति सपक्षाभावः । एवमुत्तरानुमानेष्वपीति बोध्यम् ।

पक्षविपक्षैकदेशवृत्तिर्यथाऽऽकाशविशेषगुणः शब्दः प्रयत्नानन्तरीयकत्वात् । पक्षव्यापको विपक्षैकदेशवृत्तिर्यथाऽऽकाशविशेषगुणः शब्दो बाह्येन्द्रियग्राह्यत्वात् ॥

ग्रहणयोग्यत्व सर्वशब्देष्वस्तीति पक्षव्यापकत्वम । अन्यत्र तु क्वचित्सुखादौ नास्तीति विपक्षैकदेशवृत्तित्वम् ।

विपक्षव्यापकः पक्षैकदेशवृत्तिर्यथाऽऽकाशविशेषगुणः शब्दोऽपदात्मकत्वात् ॥

सुप्तिङन्त पदम् । अपदात्मकत्व भेर्यादिशब्द एवास्तीति पक्षैकदेशवृत्तित्वम् । अत्र चोदयति ।

---

१ ङ. reads कार्यत्वात् ।

ननु चत्वार एव विरुद्धभेदा नान्ये तेषामसिद्धलक्षणोपपन्नत्वादिति॥

चत्वार इति ये पक्षव्यापकास्ते । नान्ये इति ये पक्षैकदेशवृत्तयः । कस्मात् तेषामसिद्धलक्षणोपपन्नत्वात् । तदुक्तम् । अपक्षधर्मस्य हि त्रयी गतिः । असिद्धो हेतुर्विरुद्धोऽनैकान्तिको वेति । परिहरति ।

नैष दोषः । उभयलक्षणोपपन्नत्वेनोभयव्यवहारविषयत्वात् तुलायां प्रमाणप्रमेयव्यवहारवत् ॥

यथा सुवर्णादिद्रव्ये यत्तावधारणे कारणत्वात् तुला प्रमाण, तुलान्तरतुलित द्रव्येण प्रमीयमाण प्रत्यक्षेण गृह्यमाण स्वरूप प्रमेयं च भवति तथेत्यर्थः ।

अनैकान्तिकभेदास्तु । पक्षत्रयव्यापको यथाऽनित्य शब्द प्रमेयत्वात् ॥

स्पष्टमेतत् ।

पक्षव्यापकः सपक्षविपक्षैकदेशवृत्तिर्यथाऽनित्य शब्द प्रत्यक्षत्वात् ॥

स　अत्रास्मदादिबाह्येन्द्रियग्रहणयोग्यत्व विवक्षितं, तच्चात्र पक्षीकृते शब्दे र्वत्रास्तीति न पक्षैकदेशवृत्तित्वमस्य नापि पक्षत्रयव्यापकत्वमिति ।

पक्षसपक्षव्यापको विपक्षैकदेशवृत्तिर्यथा गौरयं विषाणित्वात् ॥

सर्वत्र [illegible]षाणिन एव गोपिण्डस्य पक्षीकृतत्वात्पक्षव्यापकत्वम । सपक्षे गोपिण्डे पक्ष[illegible]द्भावः सद्योजातस्यापि वत्सस्य विषाणयोग्यत्वादिति ।

प्राक्तन **[illegible]विपक्षव्यापकः सपक्षैकदेशवृत्तिर्यथा नायं गौर्विषाणित्वात् ॥**

— [illegible]ानुमानसपक्षविपक्षयोरत्र वैपरीत्यमिति पक्षविपक्षव्यापकत्वमस्य ।

त्वात् ॥

१ ड[illegible] reads उपपन्नत्वेनासिद्धत्वात्, ग. घ. च read उपपन्न-

२ ग[illegible]

३ [illegible]ग, घ. ङ. च. read उपपन्नत्वेन

ङ. reads नित्य

पक्षत्रयैकदेशवृत्तिर्यथा नित्या[1] पृथिवी प्रत्यक्षत्वादिति ॥

अत्राप्ययोगिबाह्येन्द्रियग्राह्यत्वमेव प्रत्यक्षत्वं विवक्षित वेदितव्यम् ।

पक्षसपक्षैकदेशवृत्तिर्विपक्षव्यापको यथा द्रव्याणि दिक्काल-मनांसि, अमूर्तत्वात् ॥

पक्षैकदेशे मनसि द्रव्यत्वेन पृथिव्यादौ सपक्षे चामूर्तत्वं हेतुर्नास्ति । आत्माकाशयोस्तु सपक्षयोरपि विपक्षे च गुणादौ सर्वत्र अल्पपरिमाणरहितत्वं ह्यमूर्तत्वम ।

पक्षविपक्षैकदेशवृत्तिः सपक्षव्यापको यथा न द्रव्याणि दिक्कालम-नांस्यमूर्तत्वात् ॥

अत्रापि प्राक्तनानुमानसपक्षो विपक्षीभूत इति विपक्षैकदेशवृत्तित्वमस्य । अद्रव्यत्वेन सपक्षे गुणादौ व्यापकत्वममूर्तत्वस्य हेतोः ।

सपक्षविपक्षव्यापकः पक्षैकदेशवृत्तिर्यथा न द्रव्याण्याकाशकाल-दिगात्ममनांसि क्षणिकविशेषगुणरहितत्वात् ॥

आश्रये सत्याशुतरविनाशित्व क्षणिकत्वम् । क्षणिकविशेषगुणरहितत्व पक्षी॰ कृतेषु दिक्कालमनःस्वेव वर्तते नाकाशात्मनोः । अद्रव्यत्वेन सपक्षे गुणादौ विपक्षेषु पृथिव्यप्तेजोवायुषु सर्वत्रास्तीति । यद्यपि तेजोद्रव्यस्य कस्यचिद् विद्युदादेराशुतरविनाशित्वात्तद् विशेषगुणावपि रूपस्पर्शौ शीघ्रतरविनाशिनौ तथापि तस्मिन्सत्याश्रये विनाशाभावान्न क्षणिकत्वमिति विपक्षव्याप्तिः ।

अनध्यवसितभेदास्तु । अविद्यमानसपक्षविपक्षः पक्षव्यापको यथा सर्वमनित्यं सत्त्वात् ॥

सत्त्वादिति विद्यमानत्वादित्यर्थः ।

अविद्यमानसपक्षविपक्षः पक्षैकदेशवृत्तिर्यथा सर्वमनित्यं कार्यत्वात् । विद्यमानसपक्षविपक्षः पक्षव्यापको यथाऽनित्यः शब्द आकाशविशेषगुणत्वात् ॥ स्पष्टम् ।

---

१ ग. घ. ङ. च. read अनित्या ।

विद्यमानसपक्षविपक्षः पक्षैक देशवृत्तिर्यथा सर्वं द्रव्यमनित्यं क्रियावत्वात्॥

पक्षीकृतेष्वाकाशादिषु क्रियावत्त्वस्याभावादिति पक्षैकदेशवृत्तित्वम्। पक्षीकृताच्च द्रव्यादन्यत्राभावादसाधारणत्वमिति।

अविद्यमानविपक्षो विद्यमानसपक्षः पक्षव्यापको यथा सर्वं कार्यं नित्यमुत्पत्तिमत्त्वादिति ॥

सर्वकार्यस्य पक्षीकारेण नित्यत्वस्य साध्यस्य सपक्षा आकाशादयः सन्ति न तु विपक्षा अनित्यस्य सर्वस्य पक्षीकृतत्वादिति।

अविद्यमानविपक्षो विद्यमानसपक्षः पक्षैकदेशवृत्तिर्यथा सर्वं कार्यं नित्यं सावयवत्वात्।

अत्रापि पूर्ववत् प्रागभावप्रध्वंसाभावयोः सपक्षत्वं न पुनर्विपक्षत्वम्। अविद्यमानसपक्षो विद्यमानविपक्षः पक्षव्यापकस्तु केवलव्यतिरेकी, नासाधारणो व्याप्तिमत्वात्। अव्याप्तस्तु भवत्यसाधारणो यथा सर्वं प्रधानान्वितं कार्यत्वादिति। नहि प्रधानान्वितत्वेन किंचिद्बाधकमस्तीत्यव्याप्तिः। अत्रैव च साध्ये कुपितत्वादिति भागासिद्धो वेति।

कालात्ययापदिष्टभेदास्तु। प्रत्यक्षविरुद्धो यथाऽनुष्णोऽग्निः कृतकत्वात् ॥

सर्वथैव गृहीतस्य निषेद्धुमशक्यत्वादुष्णत्वग्रहणमङ्गीकार्यम्। ग्रहणं च प्रत्यक्षेणाग्न्यादावेवेति प्रत्यक्षस्य बलीयस्त्वम्।

अनुमानविरुद्धो यथा परमाणूनामनित्यत्वं मूर्तत्वात् ॥

---

१ ग, घ, ङ, and च read उत्पत्तिधर्मकत्वात्.

२ घ adds अविद्यमानसपक्षः विद्यमानविपक्षः पक्षव्यापको यथा सर्वं कार्यं अनित्यं उत्पत्तिधर्मकत्वात्। अविद्यमानसपक्षः विद्यमानविपक्षः पक्षैकदेशवृत्तिर्यथा सर्वं कार्यमनित्यं सावयवत्वात् ॥

१ ग, ङ, and च read अनित्याः परमाणवः मूर्तत्वात् ॥

यद्यप्यनुमानमात्रेणानुमानस्य बाधो न सम्भवति तथापि बलवता दुर्बलो बाध्यते प्रत्यक्षेणेव। नहि प्रत्यक्षमेवानुमानस्य बाधकम्। अन्यथा हि विवादपदेऽलातचक्रे प्रत्यक्षमपि बाधकं स्यात्। तथाह्यत्र विवादपदमलातचक्रं न भवति विशिष्टालातत्वात्। अभ्रमणावस्थालातवदिति। अनुमानमेव बाधक, प्रत्यक्षं चाशुतरभ्रमणवशाद् भ्रान्तम्। एवमिहापि परमाणुसाधकस्याप्रामाण्ये धर्मिण एवाभावान्मूर्तत्वानुमानमाश्रयासिद्ध स्यात्। प्रामाण्ये वा तस्य पारवर्येण नित्यत्वसाधकत्वात्तेन बाधितविषयत्वमिति। तथाहि अल्पपरिमाणतरतमभावः क्वचिदाश्रये विश्रान्तः परिमाणतरतमभावत्वान्महत्परिमाणतरतमभाववदिति निरतिशयाल्पपरिमाणवस्तुसिद्धौ तस्योपादानकारणाभावादनुत्पत्तिः। कार्यापेक्षयाल्पपरिमाणानि खलूपादानानि यथा पटस्य तन्तवः। न च परिमाणुभ्योऽल्पपरिणाम किंचिदस्ति। अतः कारणशून्यवस्तुसिद्धावनित्यत्व धर्मिग्राहकप्रमाणबाधितमिति।

आगमविरुद्धो यथा ब्राह्मणेन[1] सुरा पेया द्रवद्रव्यत्वात् क्षीरवदिति ॥

> गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
> यथैवैका तथैवान्या न पातव्या द्विजोत्तमैः ॥
> सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
> तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न पिबेत्सुराम् ॥

इत्यादिरागमः। न चागमस्यैवानुमानेन बाध इति वाच्यम्। पेयत्वं हि सुरायाः पीताया अपापहेतुत्वं साध्यमन्यथा सिद्धसाधनत्वप्रसंगः स्यात्। तच्च साध्य दृष्टान्ते क्षीरादावागमैकसमधिगम्यम्। अस्मदादेः तदप्रामाण्ये च दृष्टान्तस्यासिद्धावनुमानस्यानुस्थानप्रसंगात् तस्मादत्रागमस्यैव बलवत्त्वमिति।

प्रत्यक्षैकदेशविरुद्धो यथा सर्वं तेजोऽनुष्णं रूपित्वादिति ॥

---

१. ग reads ब्राह्मणेन पेय सुरादि.

सर्वस्य तेजसोऽनुष्णत्वसाधने परमाणुषु ज्योत्स्नाया वास्मदादीनां प्रत्यक्षेण विरुद्धो न संभवति । प्रत्यक्षैकदेशविरुद्धो प्रत्यक्षैकदेशविरुद्ध इत्यर्थः ।

अनुमानैकदेशविरुद्धो यथा नित्याश्रया द्रवत्वरूपरसगंधस्पर्शा नित्या अप्रदेशवृत्तिसमानजात्यारंभकत्वे सति परमाणुवृत्तित्वात् तद्गतैकत्ववदिति ॥

परमाणुवृत्तित्वादित्युक्ते संयोगेन व्यभिचारः तन्निवृत्त्यर्थमप्रदेशग्रहणम् । तथापि द्वित्वादौ व्यभिचारस्तत्परिहाराय समानजात्यारंभकत्वे सतीति पदम् । तथापि द्व्यणुके व्यभिचारस्तन्निवृत्त्यर्थं गुणे सतीति विशेषणमूह्यम् । अत्र च नैमित्तिकद्रवत्वपार्थिवपरमाणुरूपादिष्वेव नित्यत्वमनुमानेन विरुद्ध्यते न सांसिद्धिकद्रवत्वसलिलादिपरमाणुरूपादिष्विति । तथाहि पार्थिवपरमाणुरूपरसगंधस्पर्शा अग्निसंयोगजाः पार्थिवविशेषगुणत्वात् घटरूपादिवत् पार्थिवतैजसपरमाणुद्रवत्वं पाकजं पार्थिवतैजसद्रवत्वात् सर्पिः सुवर्णादिद्रवत्ववत् ।

आगमैकदेशविरुद्धो यथा सर्वेषां देवर्षीणां शरीराणि पार्थिवानि शरीरत्वादस्मदादिशरीरवदिति ॥

केनचिद्देवानामृषीणां च शरीराणि आप्यतैजसवायवीयानि श्रूयन्ते तस्मादागमैकदेशविरुद्धोऽयं हेतुः ।

प्रकरणसमस्योदाहरणं यथाऽनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात्सपक्षवत् ॥[1]

एक एवायं हेतुरनित्यत्व इव नित्यत्वेऽपि समान इति ।

नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात्सपक्षवदिति[2] । एकत्र तुल्यलक्षणविरुद्धहेतुद्वयोपनिपातो विरुद्धाऽव्यभिचारीत्येके ॥

एक इति वयमित्यर्थः । अन्ये तु प्रकरणसमोऽयमित्याहुः । भिन्नविषयो हेतुसंनिपातो विरुद्धाऽव्यभिचारी माऽभूदित्येकत्रेतिपदम् । तथापि नित्यः

१ च. omits अनित्यः शब्दः...सपक्षवत् ।
२ च. reads गगनवत् ।

शब्दः कार्यत्वाद् घटवद् गुणः शब्दः कर्मव्यतिरिक्तसामान्यवत्वे सति सामान्यवतामनाधारत्वाद्रूपादित्यनयोर्विरुद्धाव्यभिचारित्वं स्यात् तन्निषेधाय विरुद्धग्रहणम् । एवमपि नित्यः शब्दः प्रमेयत्वादनित्यः शब्दः कार्यत्वादित्यनयोस्तथात्व स्यादित्यतस्तुल्यलक्षणग्रहणम् । प्रकृतप्रमेयस्यानैकान्तिकत्वात् तुल्यलक्षणत्व त्रिरूपाऽऽत्मकतुल्यलक्षणाभावादुदाहरति—

यथा नित्यमाकाशममूर्तद्रव्यत्वादात्मवत्, अनित्यमाकाशमस्मदादिबाह्येन्द्रियग्राह्यगुणाऽऽधारत्वाद् घटादिवत् ॥

ननु वस्तुनो द्वैरूप्यासंभवादवश्यमन्यतरानुमान सुनष्टमेव ततश्चासिद्धादिदूषणदुष्टत्वात्तेष्वेवान्तर्भावो भविष्यति किं हेत्वाभासाऽभ्युपगमेनेत्याऽऽशंक्याऽऽह ।

स खलु पुरुषविशेषमपेक्षमाणो हेत्वाभासो भवत्यन्यतरासिद्धवदिति॥

यथा पर प्रति असिद्ध हेतुं य. समर्थयितुमशक्तस्तदपेक्षयाऽन्यतरासिद्धो हेत्वाभासो भवति, यथा वा दूषणान्तरोद्भावनासमर्थस्य प्रकरणसम. तथा-दूषणान्तरोद्भावनाया विकलशक्तेर्विरुद्धाव्यभिचारीति । यदा त्वन्यतरानुमानस्य धर्मिग्राहकप्रमाणबाधमुद्भावयति तदा कालात्ययापदिष्टदोषदुष्ट भवत्येकमन्यतरत्प्रमाणमिति । अत्र पुनरनित्यत्वसाधकानुमानमेव धर्मिग्राहकप्रमाणबाधितम । तथाहि व्यापकमेवाऽऽकाशमिति प्रत्यक्षपरिच्छेदे समर्थितम । अतः समानजातीयोऽपादानकारणाभावादाकाशमनुत्पत्तिधर्मक सिद्धमिति कथ तदनित्य भविष्यतीति ।

हेतुप्रसगेन हेत्वाभासानभिधायोदाहरणाऽऽख्यमवयवमाह—

सम्यग्दृष्टान्ताभिधानमुदाहरणम् ।

सम्यगित्यभिधानविशेषणं भिन्नं पदम् । तद्वाव्या त्यभिधानादोर्निरासार्थम उदाहरणभेदमाह—

---

१ ङ reads अमूर्तत्वात् । २ ग, घ, ङ and च add एव before अनित्य ३ च reads ग्राह्यविशेषगुण०

तद्द्विविधम् । साधर्म्यवैधर्म्यभेदात् ॥

साधर्म्यवैधर्म्ये एव भेदस्तस्माद्द्विविधस्यापि लक्षणोदाहरणे दर्शयति ।

तत्रान्वयमुखेन दृष्टान्ताभिधानं साधर्म्योदाहरणं यथाऽनित्यः शब्दस्तीव्रादिधर्मोपेतत्वात् । यद्यत्तीव्रादिधर्मोपेतं तत्तदनित्यं दृष्टं यथा सुखादीति । व्यतिरेकमुखेन दृष्टान्ताभिधानं वैधर्म्योदाहरणं यथा यदनित्यं न भवति तत्तीव्रादिधर्मोपेतमपि न भवति यथाऽऽकाशमिति । एतेन उदाहरणाभासानामनुदाहरणत्वमुक्तं भवति ॥

दृष्टान्तग्रहणव्यासे प्रमाणोपपन्नत्वं सूचयितुं न पुनरवश्यमुदाहरणं वाच्यमिति नियमयितुं । शेषं स्पष्टम् । उदाहरणलक्षणाभिधानादुदाहरणाभासा निरस्ता भविष्यन्तीत्यभिप्रायेण तल्लक्षणमवातरभेदं च सोदाहरणमाह ।

उदाहरणलक्षणरहिता उदाहरणवदाभासमाना उदाहरणाभासास्ते चानेकप्रकारा तथा चाऽनित्यं मनो मूर्तत्वादित्येतस्मिन्प्रयोगे सर्वे उदाहरणाभासा उच्यन्ते इति ॥

विस्तारभीत्येति शेषः ।

यन्मूर्तं तदनित्यं यथा परमाणुरिति साध्यविकलः ॥

साध्यस्य अनित्यत्वस्य परमाणावभावात् ॥

यथा कर्मेति साधनविकलः ॥

साधनस्य मूर्तत्वस्य कर्मण्यभावात् ।

यथाऽऽकाशमित्युभयविकलः ॥

उभाभ्यां साध्यसाधनाभ्यां विकलः दृष्टान्ताभासः इति सर्वत्र संबंधः ।

स्पष्टम् ।

---

१ घ, and च read साधर्म्योदाहरणं, वैधर्म्योदाहरणं चेति ।

२ क omits एतेन ... भवति ।

३ ग, घ, ङ, च read अनित्यं दृष्टं

यथा खरविषाणमित्याश्रयविकलः ॥ स्पष्टम् ।

घटवदित्यव्याप्त्यभिधानम् ॥

न व्याप्त्यभिधानमव्याप्त्यभिधानम् । यन्मूर्तं तदनित्यमिति वचनमन्तरेण व्याप्तेरप्रतीते. ।

यदनित्यं तन्मूर्तं दृष्टं यथा घट इति विपरीतव्याप्त्यभिधानमिति ॥

यत्र साधनजातीयमस्ति तत्र साध्यजातीयमवश्यमस्तीति हि वक्तव्यम् । अन्यथाभिधान तु विपरीताव्याप्त्यभिधानम् ।

एतौ वचनदोषौ ॥

अव्याप्त्यभिधानविपरीतव्याप्त्यभिधानरूपौ वचनदोषौ । आद्याश्चत्वारोऽर्थदोषा इति भावः ।

यदनित्यं न तन्मूर्तमपि न भवति यथा परमाणुरिति साधनाव्यावृत्तः ॥

साधन मूर्तत्व यस्माद्दृष्टान्ताभासाद्व्यावृत्तमसौ साधनाव्यावृत्तः । साधनाव्यावृत्त यस्मिन्निति वा साधनाव्यावृत्तः । उदाहरणाभास इतिसंबधात् सर्वत्र पुल्लिङ्गनिर्देशः ।

यथा कर्मेति साध्याऽव्यावृत्तः, यथा घट इत्युभयाऽव्यावृत्तः, यथा खपुष्पमित्याश्रयहीन इति ॥

व्यक्तमेतत् ।

---

१ ग reads शशविषाण; ङ reads खपुष्पं

२ क, घ, ङ, च read हीनः

३ ग, ङ, च omit यथा घटः

४ ङ, च read न भवति

आकाशवदित्यव्याप्त्यभिधानम् ॥

यदनित्यं न भवति तन्मूर्तमपि न भवतीत्यभिधानमन्तरेण व्याप्तेरप्रतीतेः ।

यद्[2] मूर्तं न भवति तदनित्यमपि न भवति यथाकाशमिति विपरीत-व्याप्त्यभिधानम् ॥

यत्र साध्यं नास्ति तत्र साधनमपि नास्तीति खलु व्यतिरेके वक्तव्येऽन्यथाभिधाने साधनात्साध्यसिद्धावङ्गं न भवतीति दोष एव ।

एतौ च वचनदोषाविति ॥

अव्याप्त्यभिधानविपरीतव्याप्त्यभिधानलक्षणौ ।

अत्राद्याः षट् साधर्म्योदाहरणाभासाः इतरे षड्वैधर्म्योदाहरणाभासाः।

अन्ये तु सन्देहद्वारेणापरानष्टावुदाहरणाभासान्वर्णयन्ति ॥

सन्देह एव द्वारमुपायस्तेन ।

संदिग्धसाध्यो यथा महाराज्यं करिष्यत्ययं सोमवंशोद्भूतत्वाद्विवक्षितराजपुत्रवदिति ॥

सोमवंशोद्भूतत्वेन निश्चित एव राज्यमकुर्वाणो दृष्टान्तीकृतः । न चासौ राज्यं करिष्यतीति निश्चयोऽस्त्यतः संदिग्धसाध्य एव दृष्टान्ताभासः ।

संदिग्धसाधनो यथा नायं सर्वज्ञो रागादिमत्त्वादन्यपुरुषवदिति ॥

अत्रापि येनकेनचित्प्रकारेण निश्चितोऽसर्वज्ञो रागादिमत्त्वेनानिश्चितो दृष्टान्तीकृतः ।

संदिग्धोभयो यथा गमिष्यत्ययं स्वर्गं विवक्षितः पुरुषः समुपार्जितशुक्लधर्मत्वाद्देवदत्तवदिति ॥

---

१ च reads यथाकाश २ क and ग read यदमूर्तं ३ क omits यथाकाश ४ ग, घ, ङ च read रथ्यापुरुष० ५ घ. ङ read अपरिचित देवदत्तपुत्रवत्

अत्र तु संदिग्धमुभयं स्वर्गगमन समुपार्जितशुक्लधर्मत्व च यस्य स संदिग्धो-भय' पुरुषो दृष्टान्तीकृतः ।

संदिग्धाश्रयो यथा नायं सर्वज्ञो बहुवक्तृत्वाद्भविष्यद्देवदत्तपुत्र-वदिति ॥

भविष्यद्देवदत्तपुत्रे प्रमाणाभावात्संदिग्धाश्रय उदाहरणाभासः ।

संदिग्धसाध्याव्यावृत्तो यथा यो महाराज्यं न करिष्यति स सोमवं-शोद्भूतोऽपि न भवति यथाऽन्यो राजपुरुष इति ॥

साध्यमव्यावृत्त यस्मादसौ साध्याव्यावृत्तः संदिग्धश्चासौ साध्याव्यावृत्तश्च संदिग्धसाध्याव्यावृत्तः सोमवशादन्यत्रोद्भूतस्याऽपि महाराज्याकरणे प्रमाणा-भावात् ।

संदिग्धसाधनाव्यावृत्तो यथा यस्तु सर्वज्ञ स रागादिरहितो यथा समस्तशास्त्राभिज्ञः पुरुष इति ॥

समस्तशास्त्राभिज्ञस्य रागादिरहितत्वे प्रमाणाभावात् संदिग्धसाधनाव्या-वृत्त इत्यर्थः ।

संदिग्धोभयाव्यावृत्तो यथा य स्वर्ग न गमिष्यति स समुपार्जित-शुक्लधर्मोऽपि न भवति यथा दुःस्थः पुरुष इति ॥

दुःस्थस्याऽपि पुरुषस्य स्वर्गागमने शुक्लधर्माभावे च प्रमाणाभावदिति भाव ।

संदिग्धाश्रयो[1] यथा यः सर्वज्ञः स बहुवक्ताऽपि न भवति यथा भविष्यद्देवदत्तपुत्रः ॥

स्पष्टमेतत । चतुर्थावयवस्य लक्षणमाह ।

दृष्टान्ते प्रसिद्धाऽविनाभावस्य साधनस्य दृष्टान्तोपमानेन पक्षे व्याप्तिव्यापकं वचनमुपनयः ॥

---

१ क reads संदिग्धाश्रयाव्यावृत्तो यथा

साधनस्य च पक्षे व्याप्तिख्यापक वचनमुपनय इत्युक्ते हेतुरूपवचनस्याप्युपनय-प्रसगस्तन्निवृत्त्यर्थं दृष्टान्तोपमानेनेतिपद तच्चोपलक्षणम् । तेन दृष्टान्तोपमानेन वा दृष्टान्तवैधर्म्येण वा सहेत्यर्थः । शेष स्वरूपकथनार्थं ।

स द्विविधः ॥

द्वैविध्य दर्शयति ।

तथा च तीव्रादिधर्मोपेतः शब्द इति साधर्म्योपनयः । न च तथा तीव्रादिधर्मोपेतः शब्दो न भवतीति वैधर्म्योपनयः ॥

यद्यपि द्वौ नञौ प्रकृतमर्थं गमयत इति न्यायेनार्थभेदो नास्ति तथाप्युक्तिः भेदादुपनयभेदः, उक्तिभेदोऽप्युदाहरणभेदादिति ।

उपनयानन्तरम् ॥

निगमन व्याख्यायत इति शेष । तदाह ।

सहेतुक प्रतिज्ञावद्वचनं निगमनं तस्मादनित्य एवेति ॥

सहेतुकमिति तस्मादित्यनूद्यमानहेतुकमित्यर्थः, प्रतिज्ञावद्वचनामिति तत्समानं न तु प्रतिज्ञैव । परेणानिश्चितस्य सिसाधयिषितस्याभिधान हि प्रतिज्ञा । निगमन तु प्रतिज्ञातार्थसाधकहेत्वभिधानेन निश्चितस्यार्थस्याभिधानमिति । एव तर्हि व्याप्तिलिंगाभिधानादेव साध्यसिद्धेर्व्यर्थं निगमनमित्याशक्याऽऽह ।

न चेदमनर्थकम् । साध्यविरुद्धाभावप्रतिपादकप्रमाणसूचकत्वादस्य ॥

साध्यामानित्यत्वादिस्तस्य विरुद्धो यो नित्यत्वादिस्तस्याभावोऽनुपपन्नत्व तस्य प्रतिपादक यत् प्रमाण तस्य सूचकत्वात् । तस्मादनित्य इत्युक्तम् । सिद्धे सत्यारभो नियमार्थ इति न्यायान्नित्यो न भवति, तत्र प्रमाणाभावाद्बाधक सद्भावाच्चेति प्रतीतिः । तर्हि किमर्थमित्याशक्याऽऽह ।

---

१ च om. न च २ ग, ङ. च read प्रतिज्ञावचन, घ reads प्रतिज्ञायाः पुनर्वचन ३ after this च adds तदपि द्विविधम्—साधर्म्य-वैधर्म्यभेदात् ४ च reads इति साधर्म्यनिगमन.

न च तदन्तरेण साध्यावधारणमुपपद्यते ॥

तदन्तरेण विपक्षबाधकप्रमाणमन्तरेण साध्यस्यावधारण निश्चयो नोपपद्यत इत्यस्मिन्नर्थे सूत्रसंवादमाह ।

तथा चोक्तम् ' विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारण निर्णय ' (गौ सू १ १ ४१) इति ॥

विमृश्य सशय कृत्वा निर्णय पुरुषेण क्रियते । काभ्या पक्षप्रतिपक्षाभ्या, पक्षविषय साधन प्रतिपक्षविषय दूषणमुपचारेण पक्षप्रतिपक्षशब्देनोक्तम् । किं च निगमनमसाधनागमिति चत्वारो(?) बौद्धस्य स्ववृत्तिविरोधा इत्याह ।

निगमनाभिधानमसाधनागामित्यभ्युपगम्य बाधक ॥ प्रमाणमभ्युपगच्छतो निग्रहस्थान प्रसज्यते निगमनार्थत्वाद् बाधकस्येति ॥

निगमनार्थत्वादिति निगमनप्रयोजनत्वादित्यर्थ । क्षणिकत्वादौ सत्त्वादिति साधनमभिधाय पश्चात् " असन्तोऽक्षणिकास्तस्य क्रमाक्रमविरोधत " इत्यादिना बाधक प्रमाण कुर्वतो बौद्धस्य स्ववृत्तिविरोधान्निग्रह स्यादित्यर्थ ।

ननु सत्यपि निगमनवचने विप्रतिपद्यमानस्य पारिताषाभावाद्बाधकमेवाभिधीयता किमनेनेत्याशङ्क्याह ।

निगमनार्थविप्रतिपत्तौ हि बाधकप्रमाणोपन्यासो युक्त , हेत्वर्थविप्रतिपत्तौ तत्साधकप्रमाणोपन्यासवदिति ॥

इदानी पञ्चावयवरूपानुमानस्तुतिद्वारेण कथालक्षण प्रपञ्चयति ।

सोऽय परमो न्यायो विप्रतिपन्नपुरुषप्रतिपादकत्वात्कथाप्रवृत्तहेतुत्वाच्च ॥

सोऽय पञ्चावयवरूपो न्याय परम उत्कृष्ट । का पुनरिय कथेत्याशङ्क्याह ।

वादिप्रतिवादिनो पक्षप्रतिपक्षपरिग्रह· कथा ॥

साधनदूषणरहितपक्षप्रतिपक्षपरिग्रहमात्र कथा मा भूदिति वादिप्रतिवादिग्रहणम् । यथायोग साधनदूषणैर्वादिप्रतिवादिनोरित्यर्थ ।

भेदमाह ।

सा द्विविधा वीतरागकथा विजिगीषुकथा चेति ॥

तयोर्लक्षणमाह

यत्र वीतरागो वीतरागेणैव सह तत्वनिर्णयार्थं साधनोपालम्भौ करोति सा वीतरागकथा वादसंज्ञयैवोच्यते ॥

यथा विजिगीषुकथाया वाद इति सामान्यसंज्ञा जल्प इति च विशेष संज्ञा दृष्टा न तथात्र विशेषसंज्ञान्तरमस्तीत्यर्थ । वादसंज्ञा च सकलकथा साधारणीति लोकव्यवहाराद्विज्ञायते तथा जल्पे च क्रियमाणे वाद कुरुत इति व्यवहरन्ति । वीतरागकथा वादसंज्ञयैवोच्यत इत्यत्र सूत्रकारवचन दर्शयति ।

तथा चोक्तम्, प्रमाणतर्कसाधनोपालम्भ सिद्धान्ताविरुद्ध पञ्चावयवोपपन्न पक्षप्रतिपक्षपरिग्रहो वाद (गो.सू १ २ १) इति ॥

साध्यते पक्षोऽनेन साधन, उपालभ्यते दूष्यते प्रतिपक्षसाधन येन स उपालम्भ इति प्रमाणैस्तर्केण वा विषयीकृतसामर्थ्यौ साधनोपालम्भौ यत्र स प्रमाणतर्कसाधनोपालम्भ । पक्षप्रतिपक्षात्मकत्व कथात्रयेऽप्यस्तीति तत्रातिव्याप्तिमाभूदिति प्रमाणेत्यादिपदम् । तत्र साधनोपालम्भग्रहणेन वितण्डातो व्यवच्छेद । नहि वितण्डायामुभाभ्यामपि साधनमुपालम्भश्चाच्यते । जल्पव्यवच्छेदस्तु प्रमाणतर्कग्रहणेन । कथमनेन साधनेन स्वपक्ष साधयितु शक्य, अनेन वोपालम्भेन प्रतिपक्षसाधन दूषयितु शक्यमिति प्रमाणेन निश्चितसामर्थ्यौ तर्केण वा विषयीकृतसामर्थ्यौ साधनोपालम्भौ वादे कार्यौ नान्यथेति शुद्धाभिसंधित्व पुरुषयोर्नियम्यते । न चैव जल्पे तत्र ह्येकान्तपराजयावस्थाया छलादिप्रयोगस्यापि सूचकत्वात् । तथा च वक्ष्यति । सिद्धान्ताविरुद्ध इत्यादि पद तु शिष्यशिक्षार्थम् । सिद्धान्ताविरुद्ध एव वाद कार्यो न पुन शुष्कतार्किकवदीश्वरस्य शरीराभ्युपगमेन । तथा स्वपक्षसाधन परपक्षदूषण साधनसमर्थन दूषणसमर्थन शब्ददोषवर्जनमित्येतै पञ्चभिरवयवैरुपपन्न कार्यो येनाभिमत सिद्धि स्यात् । शब्ददोषास्तु निरर्थकातिद्रुतोच्चारणाप्रसिद्धप्रयोगादय । स वादो द्विविध सप्रतिपक्षोऽप्रतिपक्षश्चेति । तत्रापि सूत्र दर्शयति ।

न प्रतिपक्षहीन वा कुर्यात्प्रयोजनार्थमर्थित्वे सति (गौ सू. ४ २-४९) इति ॥

त वाद प्रतिपक्षविषयसाधन प्रतिपक्ष उपचारात्। तेन हीनमपि वा कुर्यात् प्रयोजनाथ तत्त्वज्ञानार्थमर्थित्वे सति। अस्य सूत्रस्य तात्पर्यार्थमाह।

प्रयोजनार्थित्वेन यथा शिष्यो गुरुणा सह प्रश्नद्वारेणैवेत्यर्थ ॥

वाद करोति न पुन प्रतिपक्षसाधनाभिधानद्वारेणेति शेष। विजिगीषुकथालक्षणमाह।

यत्र विजिगीषुर्विजिगीषुणा सह लाभपूजाख्यातिकामो जयपराजयार्थं प्रवर्तते सा विजिगीषुकथा। वीतरागो वा परानुग्रहार्थं ज्ञानाङ्कुरसंरक्षणार्थं च प्रवर्तते, सा चतुरङ्गा वादिप्रतिवादिसभापतिप्राश्निकाङ्गा विजिगीषुकथा जल्पवितण्डासंज्ञयोक्ता ॥

जयपराजयार्थमिति स्वस्य जयार्थं परस्य पराजयार्थं परानुग्रहार्थमिति परेषा शिष्यादीना वेदप्रामाण्यमोक्षादौ निश्चयोत्पादनद्वारेण मोक्षशास्त्रादावाचार्यादौ श्रद्धोत्पत्तिद्वारेण वाऽनुग्रह ज्ञानाङ्कुरस्यात्मस्थस्य शिष्यात्मस्थस्य सरक्षणाय च बौद्धादिवृकेभ्य। सा जल्पसज्ञया वितण्डासज्ञया चोक्तेत्य थ अत्र सूत्रसवादमाह।

तथा चाह। तत्त्वाध्यवसायसरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवद् (गौ सू ४ २-५०) इति ॥

उभयरूपाया अपि विजिगीषुकथाया लक्षण सौत्रमेवेत्याह।

यथोक्तोपपन्नछलजातिनिग्रहस्थानसाधनोपालम्भो जल्प (गौ. सू. १ २ २) इति ॥

---

१ क omits प्रयोजनार्थित्वेन

२ ग घ add लक्षण after यथोक्त

यथोक्ते वादलक्षणे यदुपपन्न योग्य यथोक्तोपपन्न तेनोपपन्नः सम्बद्धो यथोक्तोपपन्न इत्येकस्योपपन्नशब्दस्य लोपो द्रष्टव्यः सूत्रत्वात् । उपपन्न च साधनोपालभवान्पक्षप्रतिपक्षपरिग्रह इति । प्रमाणतर्कग्रहण त्वनुपपन्न शुद्धाभिसंधिनैव जल्पः कार्य इति नियमाभावात्। सिद्धिः साधन, उपालभ नमुपलभः, छलजातिनिग्रहस्थानैस्तु साधनोपालभौ यत्र स तथोक्तः । यद्यपि छलादीनामसदुत्तरत्वात्परमार्थतस्तैः स्वपक्षसाधन प्रतिपक्षोपालभश्च कर्तु न शक्यते तथापि भ्राताना साधनोपालभबुद्धिजननात्साधनोपालभहेतुत्वमुक्त मिति । अथवा प्रमाणेनैव साधन उपालभे च क्रियमाणे तद्विघाताय परप्रयु क्ताना छलादीनामनुद्भावने प्रमाणेषु दूषितत्वबुद्ध्या साधनमुपालभन च न स्याद्, उद्भावने तु छलादीन्येवासद्दूषणत्वेन प्रतीतानि साधनोपालभहेतूना प्रमाणानामंगभाव भजन्त इति पारपर्येण छलादीना तद्धेतुत्वम् ।

स प्रतिपक्षस्थापनाहीनो वितंडा ॥

स वादो जल्पश्च प्रतिपक्षः स्थाप्यते यथा सा प्रतिपक्षस्थापना प्रमाण तया विहीनो वितंडा, न पुनः प्रतिपक्ष एव नास्तीत्यर्थ एव च वीतराग वितडा विजिगीषुवितण्डेति द्विविधा वितडा । एतच्च त प्रतिपक्षहीनमपि वा कुर्यात् (गौ. सू ४ २ ४९) इति सूत्रेणापि सूचितम्। अज्ञातस्वरूपाणा छला दीना न साधनोपालभहेतुत्वेनापि स्ववाक्ये पारवर्जन परवाक्येपूद्भावन वा कर्तु शक्यमिति तेषा लक्षणमाह ।

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ (गौ. सू १-२-१०)

अर्थस्य विरुद्धत्वेन कल्पनमर्थविकल्पस्तस्योपपत्ति सभवस्तया वचनस्य विघातो दूषण यत्तच्छलम् । उदाहरण तु विशेषलक्षणे भविष्यति । विभागमाह ।

तत्रिविधम् । वाक्छलं सामान्यछलमुपचारछल चेति॥(गौ.सू १-२-११)

त्रैविध्य लक्षणत्रैविध्यादत आह ।

तत्र यथा'ऽविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थांतरकल्पना वाक्छलम् ॥ (गौ. सू १-२-१२)

अनेकार्थाभिधायि पद वाक्य चात्र विशेषः, तस्यार्थाभिधानाय प्रयोग

एवोपचारादविशेषाभिहितेऽर्थे इत्युक्तम् । तस्मिन्सति वक्तुरभिप्रायादर्थान्तर कल्पना यत्र वचनविघाते तद्वाक्छल वाङ्निमित्तत्वात् । यद्यपि वाङ्निमित्त सर्वमपि छल तथाप्यन्यत्र सामान्योपचारयो प्रधानत्वात्तेन व्यपदेश । उदाहरणमाह ।

नवकबलोऽय माणवक इत्युक्ते, छलवाद्याह कुतोऽस्य नवकबला इति॥

नूतनकबलत्वमत्र वक्तुर्विवक्षितम्, प्रतिवादी तु नवसख्याककबलवत्त्व विवक्षितमित्यारोप्यासभवेन दूषयति । तस्य परिहारमाह ।

तस्याप्रतिपत्तिलक्षण निग्रहस्थान वाच्यम् । नव कबलोऽस्येति वक्तुरभिप्रायापरिज्ञानादिति ॥

नवकबलवत्त्वस्य प्रत्यक्षत्वान्न वक्तुरभिप्रायापरिज्ञानमिति । तत्राह

" उत्तरापरिज्ञानाद्वेति "

अप्रतिपत्तिलक्षण निग्रहस्थान वाच्यमित्यनुवर्तते । दूषणान्तरमाह सत्यम् । सिद्धसाध्यतेत्युत्तरस्यापरिज्ञानात् ।

विप्रतिपत्तेर्वा विपरीतज्ञानात् ॥

विपरीतस्य वक्तुरभिप्रायादन्यस्यार्थस्य नवसख्यासबाधित्वस्य परिज्ञानात् ।

सभवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम् (गौ. सू. १ २ १३) ॥

ब्राह्मणादेश्चतुर्वेदाभिज्ञत्वलक्षणो धर्म प्रायेण सभवतीति सभवशब्देनोक्त । तस्यातित्यातिसामान्यमतिसामान्य तेन योगादसद्भूतार्थकल्पना यत्रवचनविघाते निमित्त तत्सामान्यनिमित्तत्वात्सामान्यच्छलमिति । अत्रोदाहरणमाह ।

अहो नु खल्वय ब्राह्मणश्चतुर्वेदाभिज्ञ इत्युक्ते केनचिन्न्यायवाद्याह, किमत्राश्चर्यं सभवति हि ब्राह्मणे चतुर्वेदाभिज्ञत्वमिति । अत्र छलवाद्याह । न । व्रात्येनानैकान्तिकत्वात् ॥

चतुर्वेदाभिज्ञत्वे ब्राह्मणत्व लिङ्ग विवक्षितमिति मत्वानेनानैकान्तिको दर्शित । परिहरति ।

तस्यापि पूर्ववन्निग्रहस्थानं वाच्यम् ॥

अप्रतिपत्तिलक्षणमभिप्रायापरिज्ञानादुत्तरापरिज्ञानाद्वा विप्रतिपत्तेश्च विपरीतहेतुत्वस्य परिज्ञानादिति । चोदयति ।

कस्मात् ।

परिहरति ।

हेतुत्वेनाऽविवक्षितत्वात् । किं तर्हि । ब्राह्मणत्वे सति चतुर्वेदाभिज्ञत्वमाश्चर्यकारणं न भवतीत्यभिप्राय सुक्षेत्रे शालिसम्पत्तिवदिति ॥

क्षत्रियादावेवाश्चर्यकारण विद्याचरणसपन्नः पुनर्ब्राह्मण इति सर्वापि ब्राह्मणजातिः स्तूयते तत्र श्रद्धोत्पादनार्थमवज्ञापरिहारार्थ चेत्यर्थः ।

उपचारप्रयोगे मुख्यार्थकल्पनया प्रतिषेध उपचारच्छलम् , यथा मञ्चाः क्रोशन्तीत्युक्ते च्छलवाद्याह पुरुषा. क्रोशन्ति न मञ्चास्तषामचेतनत्वादिति ॥

क्षेत्रपरिरक्षणार्थं कृत. काष्ठमयश्चतु.स्तम्भरूपो मञ्चः । छलवादिनो दूषणमाह ।

तस्यापि पूर्ववन्निग्रहस्थान वाच्यम् । उभयथाऽपि लोके शास्त्रे च शब्दप्रयोगदर्शनादिति ॥

पराभिप्रायापरिज्ञानादुत्तरापरिज्ञानाद्वाऽप्रतिपत्तिलक्षण निग्रहस्थान विप्रतिपत्तिर्वा परेणाविवक्षितस्य मुख्यार्थस्य स्वीकारेण दूषणात् । उभयथा मुख्यप्रकारेण गौणप्रकारेण लोके शास्त्रे च प्रयोगदर्शनात् । अतो गौणशब्दप्रयोगे परेण कृते मुख्यार्थस्य प्रतिषेधात्त्वमनीपिकाप्रतिषेधोऽसौ न परोपालम्भ इति ।

जातिनिग्रहस्थानयोर्लक्षणमाह ।

प्रयुक्ते हेतौ समीकरणाभिप्रायेण प्रसंगो जातिः । पराजयनिमित्तं निग्रहस्थानम् ॥

प्रसगः प्रतिषेधः । स च प्रत्यक्षाभासादावस्तीति न चासौ जातिरतः प्रयुक्ते हेताविति पदम् । तस्याप्यसिद्धत्वादिप्रसगः प्रयुक्ते हेतौ भवती ति.

तद्व्यवच्छेदाय समीकरणाभिप्रायेणेति पदम् । असिद्धत्वादिचोदन तु परपक्ष-प्रतिषेधाय न तु स्वपक्षस्य परपक्षेण समीकरणाभिप्रायेण । यद्यपि प्राप्त्यप्राप्ति-समादिष्वेतल्लक्षण, नास्ति तेषा परपक्षेण समीकरणाभिप्रायेणाप्रवृत्तेस्तथापि बाहुल्यापेक्षयेदं लक्षण विवक्षितम् । अपक्षव्याप्त्यतिप्रसगो जातिरिति तु निर्दिष्ट सूत्रकारेण । उक्तानामनुक्ताना चानयोर्भेदाना निरवशेषेणानभिधान-हेतुमाह ।

बहवश्चानयोः सूक्ष्मा भेदास्तेषा कियन्तो भेदा लक्षणोदाहरणाभ्यां प्रदर्श्यन्ते ॥

तेषामिति निर्धारेण षष्ठी तेषा मध्ये इत्यर्थः ।

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्य-समौ (गौ. सू. ५-१-२) ॥

साधर्म्यवैधर्म्याभ्यामन्वयव्यतिरेकाभ्यामुपसहारे साध्यस्येति शेषः । तद्ध-र्मस्य साध्यधर्मस्यानित्यत्वादेर्विपर्ययो नित्यत्वादिस्तस्योपपत्तिः सिद्धिस्तदर्थे तद्धर्मविपर्ययोपपत्तेरिति तादर्थ्ये षष्ठीविधानात्साधर्म्यवैधर्म्याभ्यामेव समीक्रिय-माणौ प्रसगौ साधर्म्यवैधर्म्यसमौ । अनयोरुदाहरणमाह ।

यथाऽनित्य शब्दः कृतकत्वाद् घटवदित्युक्ते जातिवाद्याह यद्यनि-त्यघटसाधर्म्यात्कृतकत्वादनित्य शब्द इष्यते नित्याकाशसाधर्म्याद-मूर्तत्वान्नित्यस्तर्हि प्राप्नोति, यदि च नित्याकाशवैधर्म्यात् कृतकत्वाद-नित्य इष्यते, अनित्यघटवैधर्म्यादमूर्तत्वात्तर्हि नित्यः प्राप्नोति विशेषा-भावादिति । अनयोरुत्तरम् ॥

अत्रैव विकल्पोऽमूर्तत्व यथा नित्यत्वसाधक न भवति तथा सर्वमपि साधर्म्य वैधर्म्य च साध्यसाधक न भवतीत्युच्यते किंवा कृतकत्ववत्सर्वमपि साधर्म्य वैधर्म्य च साधक स्यादिति । आद्ये पक्षे जातेरनुत्थान तस्या अपि साधर्म्याद्वैधर्म्याद्वा समुत्थानात् । द्वितीये पक्षे परिहारमाह ।

अविनाभाविन. साधर्म्यस्य वैधर्म्यस्य च हेतुत्वाभ्युपगमादप्रसंगो धूमादिवदिति ॥

यथा अग्निमत्साधर्म्यादनग्निमद्वैधर्म्यादविनाभूताद्धूमादेर्वाऽग्निमत्त्वं सिध्यति न पुनरग्निमत्साधर्म्यमात्रादनग्निमद्वैधर्म्याद्वा केवलात्सिध्यति तथा चेत्यर्थः। अविनाभाविन इत्यनेन विशेषाभावोऽसिद्ध इति सूचयति।

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः (गौ. सू ५-१-४) इति ॥

साध्यः पक्षो विवक्षितः। साध्यदृष्टान्तयोर्धर्मविकल्पादुत्कर्षापकर्षविकल्प समा इत्युभयसाध्यत्वाच्च साध्यसम इति सबंधः। उत्कर्षापकर्षविकल्पशब्देषु भावे घञ्, साध्यशब्देषु भावे कृत्यः। तदयमर्थः पक्षदृष्टान्तयोर्धर्मस्य विकल्पाद्वैचित्र्याद्यदोत्कर्षं प्रसजयति तदोत्कर्षसम., यदा चापकर्षं तदापकर्षसमस्तथा साध्यदृष्टान्तयोर्धर्मस्य मूर्तत्वामूर्तत्वादेर्विकल्पनान्नित्यत्वानित्यत्वविकल्प यदा प्रसजयति तदा विकल्पसमः, यदा च साध्यदृष्टान्तयोर्धर्मविकल्पादुभयस्य साध्यत्वमपि प्रसज्यत इत्यभिधाय ततो दृष्टान्तस्य साध्यत्वे को हेतुः को वा दृष्टान्त इति प्रसजयति तदा साध्यसम। उभयसाध्यत्वाच्चेति चकारेण धर्मविकल्पः समुच्चीयते हेतुहेतुमद्भावेन च सबंध.। सूत्र विवृणोति।

साध्ये दृष्टान्तादनिष्टधर्मप्रसंग उत्कर्षसमः। इष्टधर्मनिवृत्तिरपकर्षसमः इति ॥

दृष्टान्तात्सकाशात्साध्ये शब्दादौ अनिष्टस्याविद्यमानस्य धर्मस्य सावयवत्वादेः प्रसगः परेणापाद्यमान उत्कर्षसमः। इष्टधर्मनिवृत्तिरित्यापाद्यमानेति शेषः। अनयोः स्वरूपमाह।

यदि कृतकत्वादनित्यः शब्दस्तदा घटवदेव सावयवः स्यात्। अथ नैवमनित्योऽपि तर्हि न स्यादविशेषात्। अश्रावणश्च घटो दृष्टः शब्दोऽपि श्रावणो न स्यादविशेषादिति। शब्दो यदि कृतकत्वानुमानेनानित्यो वर्ण्यते तदा घटोऽपि कृतकत्वानुमानेनानित्यो वर्ण्यः स्यात्।

---

१ क omits वर्ण्यावर्ण्य

१ क omits यदि ..वर्ण्यावर्ण्यसमौ

अथानवस्थाभयाद् घटस्तेनैवानुमानेनानित्यो वर्ण्यते तत शब्दोऽप्यव
र्ण्य स्यादविशेषादिति वर्ण्यावर्ण्यसमौ ॥

स्पष्टम् ।

अथ विकल्पसम कृतकत्वाविशेषे यथा मूर्तत्वामूर्तत्वादिधर्मविक
ल्पस्तथा नित्यत्वानित्यत्वविकल्पोऽपि स्यादविशेषादिति ॥

साध्यदृष्टान्तयोरिति वाक्यशेष ।

अथ साध्यसमो यदि कृतकत्वादुभयोरनित्यत्व तर्हि साध्यत्व
मप्युभयो स्यात् । न वा कस्यचिदविशेषादिति ॥

ततश्च साध्यत्वे को हेतुर्दृष्टान्तस्य को वा दृष्टान्त इति प्रसग साध्यसम
इति भाव ।

एतेषामुत्तरं किंचित्साधर्म्यादुपसहारे सिद्धे वैधर्म्यादप्रतिषेध
(गौ सू ५ १ ९) ॥

किंचित्साधर्म्यादीषत्साधर्म्यादुपसह्रियते यस्मिन् स उपसहारो दृष्टान्तस्तस्य
सिद्धेर्वैधर्म्यात्सर्वथा साधर्म्यादापाद्यमानादप्रतिषेध साधर्म्यस्येति शेष । अथवा
किंचित्साधर्म्यादविनाभूतकृतकत्वादिलक्षणादुपसह्रियत इत्युपसहार साध्य
तस्य सिद्धेर्वैधर्म्यादविनाभावशून्यादप्रतिषेध साध्यस्य । सूत्रार्थं सक्षेपेणाह ।

किंचित्साधर्म्याद्धूमवत्त्वादिलक्षणात्साध्यदृष्टान्तयोर्धर्मविकल्पेऽपि
व्यवस्था दृष्टा । तदपलापे लोकादिविरोध सर्वानुमानाप्रामाण्यप्रस
गश्चेति ॥

व्यवस्था वन्हिमत्त्वस्यैव सिद्धिर्दृष्टा न पुनर्यस्य कस्यापि दृष्टान्तधर्मस्य सिद्धि ।
नापि तदसिद्धौ वह्निमत्त्वस्याप्यसिद्धि ।

---

१ ह omits अथानवस्थाभयात्

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ (गौ. सू. ५-१-७) इति ॥

साध्यं प्राप्यं शब्दादिकार्यं च तद्विषयं ज्ञानं। हेतोरित्यस्यानन्तरं साधकत्वमङ्गीकृतमित्युपसंहारः। विकल्पस्त्वयं जात्युत्थानानिदानानिरूपणार्थं प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकश्चेति। अत्र हेतुरसाधक इति प्रतिषेधोऽध्याहार्यः। सूत्रार्थमाह।

यद्ययं हेतुः प्राप्य साध्यं साधयेदुभयोः प्राप्त्यविशिष्टत्वादङ्गुल्योरिव किं कस्य साधनं साध्यं चेति ॥

प्राप्तिः संयोगरूपा तस्या अविशिष्टत्वं साधारणत्वं तस्मात्।

अप्राप्य साधको नास्ति काष्ठाग्निवदिति ॥

नहि काष्ठमप्राप्य वह्निर्दहति प्रकाशयति वेत्यर्थः। परिहरति।

घटादिनिष्पत्तिदर्शनात्पीडने चाभिचाराटप्रतिषेधः (गौ. सू. ५-१-८) इति ॥

निष्पत्तिरुत्पत्तिर्ज्ञप्तिरिति च पीडन इति निमित्तसप्तमी पीडनार्थमभिचारदर्शनात्। प्राप्त्यविशेषेऽपि कुलालादिना मृत्पिंड एव घटीक्रियमाण. प्रदीपादिना च प्रकाश्यमानो दृश्यते न पुनर्विपर्ययस्तथात्रापीत्यर्थः। तथाऽप्राप्त्यविशेषेऽप्यभिचारकर्म पीडन शत्रोः कुर्वद्दृश्यते न विपर्ययस्तथोभयथापि हेतुत्वोपपत्तेरयुक्तो निषेधः। सूत्रस्य तात्पर्यार्थमाह।

प्राप्त्यप्राप्त्यविशेषेऽपि प्रतिनियतार्थवृत्तय एवैते साध्यसाधनत्वादयो धर्मास्ते निराकर्तुमशक्याः सर्वप्रमाणविरोधादिति ॥

किंचायं प्रसङ्गोऽपि हेतु प्राप्तः प्रतिषेधत्यप्राप्तो वेत्यादिदोषः समानस्ततस्तेनैव स्वस्य दुष्टत्वे हेतुरदुष्ट एव। जात्युत्तरान्तरमाह।

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः (गौ. सू. ५-१-१२) ॥

---

१. ग. घ. read प्राप्त्यविशिष्टत्वाद्।

२. ग. घ. ङ. read अनयोरुत्तर before घटादि।

सोदाहरणमस्यार्थमाह ।

अनित्यः शब्दः कृतकत्वादित्युक्ते प्रागुत्पत्तेरनित्यत्वे कारणं नास्तीति नित्यः प्रसक्तस्तस्योत्पत्तिरनुपपन्नेति ॥

अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः । परिहरति ।

तथाभावादुत्पन्नस्य कारणोपपत्तेरप्रतिषेधः ॥

उत्पन्नस्य शब्दस्य तथाभावादुत्पत्तिसद्भावात्कारणोपपत्तेरनित्यत्वसाधकहेतूपपत्तेरप्रतिषेधः । अन्यथा प्रतिवादिवचनात्प्रागदुष्टो हेतरदुष्टे च दूषणानुपपत्तिरिति जातिप्रयोगव्याघातात् । तात्पर्यार्थमाह—

अनुत्पन्न· शब्द एव नास्तीति कस्य नित्यत्वादि धर्माश्चिन्त्यंते ॥

आदिशब्दादनित्यपरिग्रहः ।

जात्यन्तरमाह ।

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः (गौ. सू. ५-१-१८) ॥

त्रैकाल्येऽसिद्धिस्त्रैकाल्यासिद्धिरिति विग्रहः । एतदेव विवृणोति ।

यदि पूर्वं साधनमसति साध्ये कस्य साधनम् । अथ[2] पश्चादविद्यमानं कथं साधनम् । अथ युगपत्तथापि किं कस्य साध्यं साधनं वेति द्वयोस्तुल्यकालत्वात् ॥

अविद्यमानमिति साधकाल इति शेषः । हेतोरहेतुत्वापादनाय प्रतिषेधो हेतुसम इति । परिहरति ।

न हेतुतः साध्यसिद्धेः ॥

साध्यस्य कार्यस्य ज्ञाप्यस्य च हेतुत एव सिद्धेरुत्पत्तेर्ज्ञप्तेश्च लोके दर्शनं न युक्तः प्रतिषेधः । यदि पुनरत्र हेतुतः साध्यसिद्धिर्नाङ्गीक्रियते तदा प्रवृत्तिनिवृत्तिभ्यामपि कस्यचिद्धर्मस्यासाधनात् तयोर्वैयर्थ्यप्रसगः । एतदेवाह ।

प्रवृत्त्यादिविरोध इति सूत्रार्थः ॥

---

१ ग. घ. ङ. कार्यत्वात् ।

२ ङ. omits अथ पश्चात्......साधनम् ।

इतोऽपि हेतोः प्रतिषेधो नोपपद्यत इत्याह ।

प्रतिषेधानुपपत्तिश्च त्रैकाल्यासिद्धेः ॥

यो य परेण प्रतिषेधः क्रियते स किं प्रतिषेध्यात्पूर्वमुतपश्चादथ युगपत । यदि पूर्वं तदाऽसति प्रतिषेध्ये कस्याय प्रतिषेधः स्यात् । अथ पश्चादसति प्रतिषेधे कथ प्रतिषेध्य । युगपच्चेत् सव्येतरगोविषाणयोरिव किं कस्य प्रतिषेधक प्रतिषेध्य वा स्यात् । एककालत्वाविशेषात् । नन्वेवमस्यापि प्रतिषेधस्य त्रैकाल्यासिद्धेर्गित दूषणे सत्यनवस्थाया कस्यापि सिद्धिर्नस्यादित्याशङ्क्याह ।

स्ववचनेनैव प्रतिषेधासिद्धौ हेतुसिद्धिरिति सूत्रार्थः ॥

स्वरूपनाशकत्वाच्च दोष एव न भवतीति भावः । एतेन सर्वोऽप्यय साधर्म्य वैधर्म्यादिजातिप्रयोगः स्वरूपमपि न प्राप्नोतीति तच्छिष्यैरूहनीयमिति सूचयति । जात्यन्तरमाह ।

एकधर्मोपपत्तेरविशेषे सर्वाऽविशेषप्रसंगात्सद्भावोपपत्तिरविशेषसम. (गौ. सू. ५-१-२३) ॥

एतदेव विवृणोति ।

यदि घटशब्दयोरेकस्य कार्यत्वस्योपपत्तेरनित्यत्वेनाऽविशेष इष्यते सर्वभावाना तर्हि सद्भावोपपत्तेरविशेष प्रसज्यत इति ॥

परिहरति ।

तत्रेदमुच्यते । सर्वथाऽविशेषे प्रत्यक्षविरोध , अनित्यत्वेनाऽविशेषे त्वनुमानागमविरोध । केनचिदविशेषे प्रमेयत्वादिना सिद्धसाधनम् ॥

सर्वथाविशेषे प्रतिषेधानुपपत्तेश्च प्रतिषेध्यप्रतिषेधयोर्भेदासिद्धेरित्यूह्यम । आत्मादिर्नित्योऽनादिवस्तुभूतत्वाद्यन्नित्य न भवति तदनादि वस्त्वपि न भवति । यथा घटादीत्यनुमानम , " अविनाशी वा अरेऽयमात्मा " (बृहदा० उ० ४।५।१४) इत्यागमस्ताभ्या विरोधः ।

निर्दिष्टकारणाभावेऽप्युपलंभादुपलब्धिसम. (गौ. सू. ५-१-२७) ॥

हेतुरयुक्त इति प्रतिषेध इति शेषः । सूत्र विवृणोति ।

पृथिव्यादिषु कार्यत्वसिद्धये निर्दिष्टस्य सावयवत्वस्याभावेऽपि बुद्ध्यादौ कार्यत्वमुपलब्धम् ॥

इत्यप्रयोजकोऽय हेतुरिति । उपलब्ध्या प्रतिषेध उपलब्धिसम इति । परिहरति ।

सपक्षैकदेशस्यापि धूमादेर्गमकत्वदर्शनादप्रतिषेधः ॥

सपक्षैकदेशे वर्तमानो हेतुरत्र सपक्षैकदेश इत्युक्त', उपचारात्, मञ्चशब्देन पुरुषवत्। सपक्षस्यैकदेशो यस्यासौ सपक्षैकदेश इति भिन्नाधिकरणो वा बहुव्रीहिः । अथ सपक्षव्यापके हेत्वतरे सत्यव्यापकस्याप्रयोजकत्व नाव्यापकमात्रस्य धूमादेः । इहाभूत्वाभावित्वस्य सपक्षस्य व्यापकत्वमिति तदप्ययुक्तम् । द्रव्यत्वसाधने सपक्षव्यापकस्य गुणवत्वस्य समवायिकारणत्वस्य वा सद्भावेऽपि वायोः क्रियावत्त्वादेरपि द्रव्यत्वासिद्धेः । नापि कार्यत्वेऽभूत्वाभावित्वमिति वाच्य । तयोः पर्यायत्वादिति । इदानीमाशङ्कापूर्वक सूत्रोक्त परिहारमाह ।

कथं तर्हि बुद्ध्यादौ कार्यत्वसिद्धिरित्यत आह कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः (गौ. सू. ५-१-२८) ॥

तद्व्याचष्टे ।

प्रमाणान्तरादपि कार्यत्वसिद्धिरित्यर्थः ॥

यथा धूमाभावेऽयोगोलकादौ प्रमाणान्तरादग्निसिद्धिस्तथेत्यर्थ । प्रमाणान्तरमेव दर्शयति ।

प्रमाणं चानुपलब्धिकारणेष्वसत्सु प्रागूर्ध्वं चानुपलंभादिति ॥

तथाहि बुद्ध्यादि कार्यमनुपलब्धिकारणेष्वसत्सु प्रागूर्ध्वं चाऽनुपलभ्यमानत्वात्, घटादिवत । येष्वावरणादिषु सत्सु बुद्धिघटादयो विद्यमाना अपि न गृह्यन्ते तान्यनुपलब्धिकारणानीत्युच्यन्ते । अस्मिन्ननुमाने जात्युत्तर सौत्र दर्शयति ।

---

१. ग. ङ. add घटवत् after अनुपलम्भात् ।

तदनुपलब्धेरनुपलंभादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः (गौ. सू. ५-१-२९) इति ॥

तद्विपरीतोपपत्तेरित्यस्मादसिद्धो हेतुरिति प्रतिषेधोऽध्याहार्यः। सूत्रमाचष्टे।

तस्य बुद्ध्यादिकार्यस्यानुपलब्धेरनुपलंभादभावसिद्धावनुपलब्धिविपरीतोपलब्ध्युपपत्तेः प्रागूर्ध्वमपि बुध्द्यादेः सद्भावः सेत्स्यतीति भावः ॥

अनुपलब्ध्या प्रत्यवस्थानमनुपलब्धिसमः, उपलभ्यमानत्व उपलब्धिरेव स्यान्नानुपलब्धिरिति भावः। परस्योत्तरमाह।

अनुपलंभात्मकत्वादनुपलब्धेरहेतुः ॥

अनुपलब्धिरनुपलभकत्वादनुपलभरूपेण प्रतीयमानत्वादहेतुः। बुद्ध्याद्युपलब्धेर्नाभावसाधकानुपलब्धिरित्यर्थः। अमुमेवार्थमाह।

नास्तीति ज्ञानमनुपलब्धिः। सा च तत्स्वभावतया प्रत्यात्मवेद्या। अतस्तदनुपलब्धिरसिध्देत्यभिप्रायः ॥

यदाऽपि उपलभ्यभावोऽनुपलब्धिस्तदाऽपि तस्याः प्रत्यात्मवेद्यत्वादनुपलब्धिरसिद्धा। तथाहि शास्त्रज्ञानमपि पूर्वं नास्तीदानीं चास्ति शास्त्रज्ञानमपि नोपलभ्यत इत्यनुपलभरूपेण जायते। एतेनोपलभ्यमानत्वादुपलब्धिः स्यादित्येतत्प्रत्युक्तम्। विधिमुखेनोपलब्धिर्यथा प्रतीयते तथाऽनुपलब्धेः प्रतीत्यभावात्। किंच परवचनस्य स्वरूपाप्रतिषेधात्मकत्वे हेतोरप्रतिषेधः स्यात् स्वरूपप्रतिषेधकत्वे स्वयमेव स्यादित्यलम्।

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः। (गौ. सू. ५-१-३५) इति ॥

अस्यार्थमाह।

अनित्यत्वस्य धर्मस्य नित्यं सर्वदा सद्भावे धर्मिणोऽपि शब्दस्य सर्वदा सद्भावः। अथानित्यत्वं सर्वदा नास्ति तथाप्यनित्यत्वाभावान्नित्यः शब्द इति ॥

धर्मिणोऽपि शब्दस्य सर्वदा सद्भावः इति धर्मिणमन्तरेण धर्मस्यावस्था

नाभावादिति भावः। नित्यत्वस्य प्रसङ्गो नित्यसमः। परिहरति।

अनित्यत्वस्य सर्वदाऽभ्युपगमे नित्यत्वाविरोधः। अनभ्युपगमे चासिद्धो हेतुः ॥

नित्य सर्वदा नित्यत्वस्य भावादित्ययमसिद्ध इत्यर्थः। यत्तु धर्मस्यावस्थानाद्धर्मिणोऽप्यवस्थानप्रसङ्ग इति दूषण तत्राऽऽह।

प्रध्वंसश्चानित्यत्वं न च तस्मिन्सति शब्दसद्भाव इति ॥

भावात्मको हि धर्मो निराश्रयो न भवति न त्वभावात्मक इति भावः। ननु सूत्रकारेणोक्तानामन्यासां विद्यमानानामिह कस्मादनभिधानमित्याशङ्क्याऽऽह।

एतेनान्यत्वस्याऽऽत्मनोऽनन्यत्वादन्यत्वं नास्तीत्यसदुत्तराणि प्रत्युक्तानि ॥

एतेन कतिपयजातीनां स्वरूपदर्शनपरिहाराभिधानेन प्रत्युक्तानि तत्समानन्यायतयेति भावः। यदिदमन्यदुच्यते तत्स्वरूपादन्यदुतानन्यत्, यदि स्वरूपादन्यत्तदात्मज्ञानादसदेव स्यात्। अथानन्यत्तदाप्यनन्यत्वादेवान्य न भवतीत्यन्यताया अभाव इतीयमनन्यसमा जातिः। कथमिय निराकृतेत्यत आह।

निमित्तान्तरात्संज्ञांतरे योज्यमानेऽप्यर्थे तथाभावस्य निराकर्तुमशक्यत्वात् ॥

निमित्तान्तरात्स्वरूपापेक्षया भेदाभावलक्षणात्सञ्ज्ञान्तरेऽनन्यशब्दे योज्यमाने परेणाप्यर्थे तथाभावस्य वस्त्वतरापेक्षयान्यशब्दवाच्यत्वस्य निराकर्तुमशक्यत्वात्। यदि वा घटादौ निमित्तान्तरात्पदार्थान्तरापेक्षया भेदलक्षणात्सञ्ज्ञान्तरेऽन्यशब्दे योज्यमानेऽर्थे तथाभावस्य स्वरूपापेक्षया भेदशून्यत्वस्य निराकर्तुमशक्यत्वात्पुलादिवदित्यर्थः।

ननु तथापि वचनवृत्त्या सगृह्य जात्युत्तराणि सर्वाणि कस्मान्नोक्तानीत्याह।

---

१. घ adds पृथक् before नास्ति।

आनन्त्यान्न सर्वाणि जात्युत्तराण्युदाहर्तुं शक्यन्तेः सूत्राणाम-प्युदाहरणार्थत्वात् ॥

सूत्राणामुदाहरणार्थत्वं च चतुर्विंशतिव्यतिरिक्तजात्यन्तरेणाप्यनन्यत्वमा-दिना स्थानान्तरे सूत्रकारेण प्रत्यवस्थानकरणाद्विज्ञायते । उपसंहरति ।

उक्ता जातिभेदाः । अथेदानीं निग्रहस्थानान्युच्यन्ते । तान्यपि विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पानन्त्यादसंख्यातानीत्यतः संक्षेपेण व्युत्पा-द्यन्ते ॥

सूत्रोक्तानि द्वाविंशतिनिग्रहस्थानानीहलक्षणोदाहरणाभ्यां प्रदर्श्यन्त इत्य-र्थः । तथा च सूत्रम् ।

प्रतिज्ञाहानिः, प्रतिज्ञान्तर, प्रतिज्ञाविरोध, प्रतिज्ञासंन्यासः, हेत्वन्तरं, अर्थान्तर, निरर्थक, अविज्ञातार्थ, अपार्थकं, अप्राप्तकालं, न्यून, अधिक, पुनरुक्तं, अननुभाषणं, अज्ञानं, अप्रतिभा, विक्षेप, मतानुज्ञा, पर्यनुयोज्योपेक्षणं निरनुयोज्यानु-योग, अपसिद्धान्त, हेत्वाभासाश्च निग्रहस्थानानि । (गौ. सू. ५ २-१) ॥

सूत्रे वाक्यात्मकानामपि विप्रतिपत्त्यप्रतिपत्तिसूचकत्वेन पराजयनिमि-त्तत्वान्निग्रहस्थानमित्युक्तम् । असमासकरणमन्योन्यनिरपेक्षाणामेषां स्वकार्यकर-णसामर्थ्यप्रकटनार्थम् । सूत्रक्रमेण लक्षणमाह ।

तत्र साध्ये प्रतिदृष्टान्तधर्मानुज्ञा प्रतिज्ञाहानिः ॥

अस्या उदाहरणमाह ।

यदि कृतकत्वादनित्यः शब्द इष्यते तर्हि आकाशवदमूर्तत्वा-न्नित्यः किं नेष्यते । एवं प्रतिवादिनोक्ते वाद्याह, भवतु किं नो बाध्यते[१] ।

---

१ ग. बोध्यते. ङ बाधते ।

तस्य नित्यत्वाभ्युपगमेनानित्यत्वप्रतिज्ञा हीयतेऽतः प्रतिज्ञाहानिर्नाम निग्रहस्थानं भवतीति ॥

उपलक्षणमेतत् । हेतुहान्यादीनामप्यनेन सग्रहः । तथाह्यनित्यः शब्दः प्रमेयत्वादित्यस्य हेतोरनैकान्तिकत्वेन प्रतिषेधे कृते सत्यमस्तु तर्हि कृतकत्वादिति ब्रुवतो हेतुहानिः । अनित्ये वाङ्मनसे कार्यत्वादित्यस्य भागासिद्ध्या प्रतिषेधे भाग एव तर्हि पक्षीक्रित इति वदतः पक्षहानिः । एवं प्रतिज्ञाविशेषहान्यादयोऽस्माभिर्न्यायभूषणेऽभिहिता इति तत्रैव ज्ञातव्याः ।

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् (गौ. सू. १-२-३) ॥

लक्षणसूत्रमुदाहरणप्रदर्शनमुखेन व्याचष्टे ।

सर्वमनित्यं सत्त्वादित्यस्य दृष्टान्ताभावेन प्रतिज्ञातार्थस्य प्रतिषेधे धर्मो विवादास्पदीभूतत्वादिलक्षणस्तस्य विकल्पः, प्रतिज्ञातार्थस्य विशेषणत्वेन योजनं । तदर्थं इति प्रतिषेधनिवृत्त्यर्थो यथा मशकार्थो धूम इति निर्देशः । विवादास्पदीभूतं सर्वमनित्यमित्येतत्प्रतिज्ञान्तरं निग्रहस्थानं हेत्वन्तरवदिति ॥

दृष्टान्ताभावेनासाधारणत्वेनेत्यर्थः । प्रतिषेधनिवृत्त्यर्थ इत्येतेन तच्छब्दः प्रतिषेधपरामर्शी, अर्थश्च निवृत्तिगर्भितप्रयोजनवाचीति सूचितम् । ननु निर्विशेषप्रतिज्ञायाः प्रहाणात्प्रतिज्ञाहानितोऽस्य को विशेषः । न स्वरूपमात्रापरित्यागात्तस्यैव विशेषणान्तरं समर्थयितुं प्रवृत्तत्वात् ।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः । यथा गुणव्यतिरिक्तं द्रव्यं, भेदेनानुपलम्भादिति ॥

नच वक्तव्यं विरुद्धहेत्वाभास एवायमतो न पृथग्वाच्य इति । व्याप्ति-

---

१ ग. ङ add घटवत् after अनुपलम्भात् ।

ग्रहणवशाद्विरुद्धहेत्वाभासे विरोधोपगमः, इह हेतुप्रतिज्ञावचनश्रवणमात्रा-देवेतीयता भेदेन पृथगभिधानम् ।

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः (गौ सू. ५-२-५) पक्षप्रतिषेधेऽनुष्णोऽयमग्निरित्यस्य प्रत्यक्षविरोधित्वेन प्रतिषेधे वाद्याह संपश्यध्वं संपश्यध्वमहो मध्यस्थाः साक्षिणो नाहमग्निमनुष्णं ब्रवीमी-त्यनुक्तोपालंभोयमित्येतत्प्रतिज्ञासंन्यासलक्षणं निग्रहस्थानमिति ॥

अत्र प्रतिज्ञासन्यासस्योपलक्षणत्वाद्धेत्वादिसन्यासा अपि निग्रहहेतवो वेदितव्याः । यथाऽनित्यः शब्दः प्रमेयत्वादित्यस्यानैकान्तिकत्वेन प्रतिषेधे कृते नाहमनित्यत्वे प्रमेयत्वं हेतुं ब्रवीमीति ब्रुवाणस्य हेतुसन्यास इत्यादिः । समो गम्यृच्छिप्रच्छिस्वरतीत्यादिसूत्रे (पा. १ ३-२९) दृशेश्चेति वक्तव्यमित्यनेन सपश्यध्यमित्यात्मनेपदम् ।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् (गौ. सू. ५-२-६) ॥

विशिष्यते येनासौ विशेषो विशेषणं न विद्यते यस्मिन्नसावविशेषः । स चासावुक्तश्चेत्यविशेषोक्तः । तस्मिन् हेतुशब्दश्च परार्थानुमानवाक्यगत-साधनभागोपलक्षकः । वचनशब्दस्याध्याहारः । तत चाविशिष्टसाधनमभिधाय तद्दूषणे च परोद्भाविते पश्चाद्विशिष्टमभिदधतो वचनं हेत्वन्तरमित्यर्थः । अस्योदाहरणमाह ।

यथा नित्या वेदा अस्मर्यमाणकर्तृकत्वादित्यस्य जीर्णकूपाऽऽरा-मादिभिरनैकान्तिकत्वेन प्रतिषेधे सप्रदायाविच्छेदे सतीति विशेषण-मिच्छतो हेत्वतरमिति निग्रहस्थानं ॥

सभवतीति शेषः । कथमित्याशङ्क्याह ।

पूर्वस्यासाधकस्योपादानात् ॥

ननु प्रतिज्ञाहान्या हेतुहान्यादीनामुपलक्षणवत्प्रतिज्ञान्तरेण हेत्वन्तर-स्याप्युपलक्षणं भविष्यतीति किमस्य पृथगुपादानेनान्यथोदाहरणान्तरादीना-

मपि पृथगुपादानप्रसङ्गः। यथा गुणः शब्दः सामान्यवत्तास्पर्शवत्वे सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वाद्रूपादिवदित्यत्र रूपमात्रस्यास्मदादिप्रत्यक्षत्वाभावात्साधनविकले दृष्टान्ते दूषिते घटरूपादिवदिति वदत उदाहरणान्तर तथोपनयान्तर निगमनान्तरमप्युदाहरणीयम्। सत्यम्। तथापि परार्थानुमानवाक्यस्य साध्यसाधनरूपतया तद्भेदविवक्षया पृथगभिधानम्। तेनात्र प्रतिज्ञान्तर निगमनान्तर च प्रतिज्ञान्तरशब्देन गृह्यते। हेत्वन्तरमुदाहरणान्तरमुपनयान्तर च हेत्वन्तरग्रहणेन गृह्यत इति।

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् (गौ. सू. ५-२-७) ॥

अत्रान्यदित्यध्याहार्यं, अर्थान्तरमिति लक्ष्यपदमेव वा लक्षणेऽप्यावृत्या संबन्धनीयम्। तेन प्रकृतात्प्रस्तुतादर्थात्साध्यसाधनात्तदूषणाद्वा यदर्थान्तर प्रकृतेनासम्बद्धार्थमनुपयोगि तदर्थान्तरमित्यर्थः। एतदेव सोदाहरणमाह।

यथानित्यः शब्दोऽस्पर्शवत्वादिति हेतोः। हेतुश्च हिनोतेर्धातोस्तुन्प्रत्यये कृते सति कृदन्तं पदमित्यादि प्रसक्त्यानुप्रसक्त्या प्रकृतार्थानुपयोगिशास्त्रान्तरमुपदिशतोऽर्थान्तरं निग्रहस्थानमिति ॥

अस्पर्शवत्वादिति हेतुमज्ञानात्प्रयुज्यानन्तरमेव स्वयमनैकान्तिकत्वमेव जानानस्तदाच्छादनार्थमेव प्रवर्तत इति भावः।

वर्णक्रमनिर्देशवन्निरर्थकम् (गौ सू. ५-२-८) यथा नित्यः शब्दः कचटतपाना गजडदबवत्वात् घझढधभवत् ॥

वर्णक्रमनिर्देशो वर्णाना पाठक्रमः, अआइई इत्यादिः, स इव तद्वत्। सादृश्य चात्रार्थशून्यत्वम्। यत्र पदार्थोऽपि नास्ति तन्निरर्थकम्। वर्णक्रमनिर्देश एवास्ति न पुनरर्थो यत्र तद्वर्णक्रमनिर्देशवदिति मत्वर्थीयो वा।

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् (गौ.सू.

---

१ ग. adds after पद--पद च नामाख्यातोपसर्गनिपातभेदाच्चतुर्विधमित्यादि।

५-२-९)॥ यद्वाक्यं वादिना त्रिरभिहितमप्यप्रतीतप्रयोगाऽतिद्रुतोच्चारणादिना निमित्तेन परिषत्प्रतिवादिभ्या न ज्ञायते तदज्ञानसंवरणायोक्तमविज्ञातार्थं नाम निग्रहस्थानमिति ॥

न ज्ञायते इति विद्यमानार्थमेवार्थतो न ज्ञायत इत्यर्थः । न पुनः स्वरूपत इत्यर्थः ।

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ((गौ. सू.५-२-१०) ॥

पूर्वं विशेषणमपरं विशेष्य तयोर्भावः पौर्वापर्यं विशेषणविशेष्यभावस्तेनायोगोऽसंबन्धस्तस्मात्कारणादप्रतिसंबद्धोऽनन्वितोऽर्थो यस्य तदसंबद्धार्थम् । तत्रवाक्ययोरनन्वितत्व उदाहरणमाह ।

यथा दश दाडिमानि षडपूपा इति ॥

पदयोरनन्वितत्वे निदर्शनमाह ।

कुण्डमजाजिनमित्यादीनीति ॥

अवयवविपर्यासवचनमप्राप्तकालम् (गौ. सू. ५-२-११) ॥

विपर्यासेन व्यत्ययेन वचनं विपर्यासवचनम् । अवयवाना विपर्यासवचनमवयवविपर्यासवचनम । सूत्रस्यार्थमाह।

प्रतिज्ञादीनामर्थवशात्क्रमस्तेषां विपर्ययेणाभिधानं निग्रहस्थानमिति॥

स्पष्टम् । एतच्च नियमकथाया निग्रहस्थानमकथाया तु न विरोध. ।

हीनमन्यतमेनाप्यवयवेन न्यूनम् (गौ. सू.५ २ १२) ॥ साधनाभावे साध्यासिद्धेरिति ॥

उक्तमेतत् ।

हेतूदाहरणाधिकमधिकम् (गौ. सू. ५-२-१३) ॥

हेतूदाहरणग्रहणं सर्वस्याधिकस्योपलक्षणम् । अस्य निग्रहस्थानत्वे कारणमाह ।

---

१ ग. अन्तिमेन.

एकेन कृतार्थत्वादितरानर्थक्यमिति ॥

एक एव हेतुर्दृष्टान्तो वा मयोच्यत इति नियमपूर्विकायामेतद्दूषणम् । न सर्वत्र । असमर्थवादिना तु सर्वदा । एतच्च न्यूनाधिकलक्षणद्वयमपि स्वस्वमताभ्युपगतावयवापेक्षया न्यूनत्वे चाधिकत्वे च दूषणं विज्ञेयम् ।

शब्दार्थयो पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् (गौ.सू.५-२-१४)॥

एतद्व्याचष्टे।

सार्थक पुनरभिधानमनुवादः । तद्व्यतिरेकेण पुनरभिधानं पुनरुक्तम् । नित्य. शब्दो नित्य. शब्द इति शब्दपुनरुक्तम् । नित्यो[1] ध्वनिरविनाशी शब्द इत्यर्थपुनरुक्तमिति ॥

सार्थक पुनरभिधान यथा गौर्गौः कामदुघेत्यादि । पुनरुक्तान्तरमाह ।

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् (गौ.सू.५-२-१६)॥ यथा साधर्म्योदाहरणेऽभिहिते वैधर्म्योदाहरणाभिधानम् ॥

व्याप्तिख्यापनार्थं ह्युदाहरणमुच्यते तच्चैकेनाप्युदाहरणेन कृतमिति व्यर्थमुभयाभिधानम् । यथा यद्यत्कृतकं तत्तदनित्यं यथा घटादीत्याभिधाय यदनित्यं न भवति तत्कृतकमपि न भवति यथा गगनम् इति । अन्वयव्यतिरेकज्ञापनार्थमुभयाभिधानमिति चेन्नैवम् । तज्ज्ञापने प्रयोजनाभावाद् व्याप्तिप्रतीत्यैवानुमानसिद्धेः । चोदयति ।

कथं तन्निग्रहस्थानमिति ॥

तदिति पुनरुक्तमात्रम् ।

कथावसानाविरोधित्वादेकेन कृतार्थत्वादितराऽऽनर्थक्यादिति ॥

उक्तस्यापि पुनरभिधानेऽव्यवस्था वैयर्थ्यं चेत्यर्थः । एतदपि नियमकथायामेव निग्रहस्थानम्, अनियमकथायां तु साक्षिप्रतिवादिनोरपेक्षायां सत्यां

---

१ घ. ङ. omit नित्यो ध्वनिः......पुनरुक्तमिति ।

स्पष्टार्थे पुनरभिधानेऽपि विरोधाभावात् त्रिरभिधाननियमाच्च नातिप्रसङ्गः । तथाप्याधिकाद्भेद न भिद्यत इति चेत् सत्यम् । पुनरुक्तमप्याधिक दर्शितमेव अधिकात्तु क्रियाभेदेन पुनरुक्तं पृथगुक्त शिष्यव्युत्पादनार्थमित्यदोषः ।

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् (गौ. सू. ५-२ १७) प्रतिवादिनो निग्रहस्थानम् ॥

उपलक्षणमेतत्, यत्प्रतिवादिदूषणस्याननुवादे वादिनोऽपि सद्भावात् । कथमेतन्निग्रहस्थानमित्याशङ्कयाह ।

अप्रत्युच्चारयन्किमाश्रयः परपक्षप्रतिषेधं ब्रूयादिति ॥

क आश्रयो विषयो यस्यासौ किमाश्रयः। एतेन दूषणमात्रानुवादेऽप्यसमर्थस्येतद्दूषणमिति सूचित न पुनः सर्वानुवादः कर्तव्य इति । त्रिरभिहितस्येत्येतदपि परिषदभ्युपगमस्योपलक्षण यावत् प्राश्निका अन्यतरस्यासामर्थ्य निश्चिन्वन्ति तावद्वक्तव्यमिति भावः ।

अविज्ञातार्थं चाज्ञानम् (गौ. सू. ५-२-१८)॥

चकारेण पूर्वसूत्राद्विज्ञातस्य परिषदा त्रिरभिहितस्यापीत्येतदाकृष्यते, तदेवाह ।

यद्वाक्य त्रिरभिहितमपि परिषदाऽवगतार्थं प्रतिवादी प्रत्युच्चारयन्नापि नार्थतः सम्यगधिगच्छति तदज्ञानं नाम प्रतिवादिनो निग्रहस्थानमिति ॥

अत्रापि प्रतिवादिग्रहणमुपलक्षणम् ।

कथामभ्युपेत्य तूष्णीं भावोऽप्रतिभा वादिप्रतिवादिनो निग्रहस्थानमिति ॥

अननुभाषणे तु न तूष्णीमास्ते किंत्वप्रत्युच्चारयन्नपि दूषणादिकमभिदधाति । अतो नानयोरभेदः ।

कार्यव्यासंगात्कथाविच्छेदो विक्षेपः (गौ. सू. ५-२-२०)॥

अस्यार्थमाह ।

कथामभ्युपगम्य सभ्येषु मिलितेषु ब्रवीत्यद्य मे महत्प्रयोजनमस्ति तस्मिन्नवसिते पश्चात्कथयिष्यामीति ॥

यदि पुनस्तदानीमेव महत्प्रयोजनं सभ्या अभ्युपगच्छान्ति तद्दर्शिनः कथाविच्छेदो न पराजय इति । न नेदमर्थान्तरेऽन्तर्भवतीति वाच्यम् । हेतुप्रयोगान्तर तरनुपयोगिवचनमर्थान्तरम् । अत्र हेतूपन्यासमपि पश्चात्कथयिष्यामीति वदत्यतोऽस्ति भेदः ।

स्वपक्षदोषाभ्युपगमात्परपक्षदोषप्रसंगो मतानुज्ञा (गौ सू.५-२-२१)॥

पक्षोऽत्र सिद्धान्तो विवक्षितः, न पुनः सिसाधयिषितधर्मविशिष्टधर्मिमात्रम् । अभ्युपगमोऽपरिहरणम् । तेन स्वसिद्धान्ते परोक्तदूषणमपरिहृत्य परसिद्धान्ते दोषप्रसजनं मतानुज्ञेत्यर्थः । तदेवाह ।

य. स्वपक्षे मनागपि दोषं न परिहरति केवलं परपक्षे दोषं प्रसंजयति भवांश्चोर इत्युक्ते त्वमपि चोर इति तस्येदं निग्रहस्थानम् ॥

कस्मादित्याऽऽशङ्क्याह ।

स्वयं दोषाभ्युपगमात्परेणानभ्युपगमात् ॥

अप्रतिषिद्धमनुमतं भवतीति न्यायेनेति भावः ।

निग्रहं प्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् (गौ. सू.५-२-२२) ॥

एतद्व्याचष्टे ।

पर्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयस्तस्योपेक्षणं निग्रहं प्राप्तोऽसीत्यननुयोग इति ॥

एतच्च निग्रहस्थानं कतरस्यात्र पराजय इति पृष्टया परिषदा समुद्भावनीयम् । निग्रहं प्राप्तस्य स्वदोषोद्भावनानुपपत्तेः ।

---

१. ग. घ. ङ. एतदुभाभ्यामनुक्तया परिषदा वक्तव्यम् ।

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः (गौ. सू. ५-२-२३) ॥

अदोषे दोषोद्भावनमित्यर्थः । एतदेवोदाहरति ।

यथा सावयवत्वेन पृथिव्यादौ कार्यत्वसाधने परो ब्रूयादप्रयोजकोऽयं हेत्वाभास इति तस्येदं मिथ्याभियोगलक्षणं निग्रहस्थानमिति ॥

द्रव्यत्वे सति द्रव्याश्रितत्व सावयवत्व न चास्य कार्यत्वस्य साधनेऽसिद्धत्वाद्यन्यतमदूषणतास्ति । बुद्ध्यादौ सावयवत्वाभावे कार्यत्वोपलम्भाद्व्याप्त्यभावेनाप्रयोजकमिति चेन्न सपक्षैकदेशवृत्तेर्धूमादेरप्यप्रयोजकत्वप्रसगात्। अथ सपक्षव्यापके हेत्वन्तरे सत्यव्यापकस्य हेतोरप्रयोजकत्वेनाव्यापकमात्रस्य धूमादे· । अत्र तु कादाचित्कत्व सकलकार्यव्यापक प्रयोजक न सावयवत्वमिति चेन्न कार्यत्वकादाचित्कत्वयो पर्यायत्वात् । अव्यापकस्याप्यसिद्धत्वादिदोषरहितत्वेन प्रयोजकत्व केन वार्यत इत्यलम् ।

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसगोऽपसिद्धान्त (गौ सू ५-२-२४)॥ यथा मिमासामभ्युपगम्य कश्चिदग्निहोत्रं स्वर्गसाधनमित्याह । कथपुनरग्निहोत्रक्रिया प्रध्वस्ता सती स्वर्गसाधिका भविष्यतीत्यनुयुक्तः प्राह अनया क्रिययाऽऽराधित· परमेश्वर. फल ददाति राजादिवदिति तस्येश्वरानभ्युपगमादपसिद्धातो निग्रहस्थानम् ॥

इति वाच्यमिति शेष· । अन्ये त्वन्यथा सूत्रमाहु· 'सिद्धान्तमुपेत्य कश्चिदर्थ प्रतिज्ञाय नियमात्तद्विरोधेन कथाप्रसग कथाकरणमपसिद्धात' इति तद युक्तमित्याह ।

प्रतिज्ञातार्थविपर्ययस्तु प्रतिज्ञाहानिर्नापसिद्धात इति । हेत्वाभासाश्च यथोक्ता (गौ. सू. ५-२-२५) ॥

यथा येन प्रकारेण हेत्वाभासा उक्तास्तेन प्रकारेण निग्रहस्थानानि न पुनः प्रमाणस्य प्रमेयत्ववल्लक्षणान्तरेण । हेत्वाभासलक्षणेनैव यथोक्तेन हेत्वाभासा उक्तास्तेन प्रकारेण निग्रहस्थानानि तदेवाऽऽह ।

हेत्वाभासलक्षणेनैव यथोक्तेन लक्षिता हेत्वाभासा निग्रहस्थानानी-त्यर्थः ॥

चकारो दृष्टान्ताभासानन्वयविपरीतान्वयादिसमुच्चये, तेषामपि निग्रहहेतुत्वात् । सूत्रोक्तानि द्वाविंशतिर्निग्रहस्थानानि न नियमार्थानि किंतूपलक्षणार्थानीति चाह ।

एतेन दुर्वचनकपोलताडनवादित्रादीनां साधनानुपयोगित्वेन निग्रहस्थानत्वं वेदितव्यम् । नियमकथायां त्वपशब्दादीनामिति ॥

एतेनेति केषांचिल्लक्षणोदाहरणप्रपञ्चनेन । नियमकथायां तु संस्कृतेन मया वक्तव्यम् वर्णत्यागेन वा श्लोकबन्धेन वेत्येवरूपायाम् ।

इति न्यायसारे पदपंचिकायामनुमानपरिच्छेदो द्वितीयः ॥

तृतीयः परिच्छेदः ।

अवसितमनुमानमागमस्येदानीं लक्षणमुच्यते ॥

अवसित निश्चितमनुमानमिति वृत्तानुकीर्तनेनागमस्यानुमानपूर्वकत्वात्तल्लक्षणानन्तरमेवास्य लक्षणावसर इति सूचयति । तथाहि समयग्रहणबलात् शब्दानामर्थबोधनसाधनत्वम् । समयग्रहण च प्रायेण वृद्धव्यवहारादनुमानरूपादेवेति ।

समयबलेन सम्यक्परोक्षानुभवसाधनमागमः ॥

समयः सकेतः पुरुषकृतो न पुनरविनाभाववत्स्वाभाविक', स्वाभाविकत्वे हि अविनाभाविधूमादिलिङ्गवन्नियतमेवार्थं बोधयेन्न तद्विपरीतम् । न हि धूमो दहनमिव तदभाव जलादिकमनुमापयति दहनादिशब्दास्तु पुरुषेण यत्र यत्र सकेत्यन्ते तत्र तत्र यथार्थामव प्रतीतिं कुर्वन्ति, अतोऽविनाभावात्समयो भिन्न' स एव बल सहकारी तेन समयबलेन । अत्र च समयविषयग्रहण स्मरण चोपचारात्समयः समयविषयज्ञानसहकारिणेति यावत् । समीच सशयादिविलक्षणस्य परोक्षस्य परोक्षत्वजातियुक्तस्यानुभवस्य स्मरणविलक्षणज्ञानस्य साधन कारण शब्दात्मकमशब्दात्मक चेष्टालिप्यक्षरादि तत्सर्वमागम' । तस्य भेदमाह ।

स द्विविधः दृष्टादृष्टार्थभेदात् ॥

अर्थः प्रयोजन तत्र दृष्टप्रयोजन आगमो यथा नद्यास्तीरे फलानि सन्ति गृहान्तर्मोदकानीत्यादि, अदृष्टार्थस्तु स्वर्गकामो यजेतेत्यादि । अर्थाऽसम्पर्कित्वात् सर्वशब्दानामप्रामाण्यमिति बौद्धो मन्यते त प्रत्याह ।

तत्र दृष्टार्थानां वाक्यानां प्रायेण प्रवृत्तिसामर्थ्यात्प्रामाण्य गम्यते॥

प्रवृत्तिः कायिकी चेष्टेष्टप्राप्त्यर्था चानिष्टपरिहारार्था च, तस्या' सामर्थ्य तत्प्रयोजनप्रापकत्व, तस्मात् । अयमभिसन्धि', स्वप्रतिज्ञापितमर्थं प्रापयन्प्रत्यक्षमनुमान च प्रमाणमिति लोके प्रसिद्धत्वाद्यथा स्वीक्रियते तद्वदागमोऽपि स्वप्रत्ययप्रापितमर्थं प्रापयन् प्रमाणमित्यङ्गीकार्यम् । अन्यथा सर्वशब्दानामङ्गुल्यग्रे करियूथशत वर्तत इति वाक्यसमत्वे शास्त्रीयलौकिकवचनानामर्थ-

शून्यत्वेन व्यर्थप्रयोगत्वान्मौनशरणमेव वाक्य स्यात् । विवादाध्यासितानि वाक्यानि प्रमाणानि । समर्थप्रवृत्तिकारणत्वात्, प्रत्यक्षादिवदिति स्थितम् ।

अदृष्टार्थाना पुनराप्तोक्तत्वेन ॥

पुन शब्द' प्राक्तनवाक्यप्रामाण्यसमर्थनप्रकारवैलक्षण्यज्ञापने । चोदयति । कथम् ॥

अदृष्टार्थाना प्रामाण्यनिश्चय इति । अयमभिसन्धिः, न तावत् प्रवृत्तसा-मर्थ्येनार्थप्रामाण्यनिश्चयः, अदृष्टार्थत्वादेव । न हि स्वर्गादय इदानीमेव केनापि कृतयागेन प्राप्यन्ते । नाप्यामोक्तत्वेन, तस्यैव निश्चेतुमशक्यत्वात् । अतः कथमदृष्टार्थाना प्रामाण्यनिश्चय इति । परिहरति ।

पुत्रकामो यजेतेत्यादिवाक्याना प्रवृत्तिसामर्थ्यात् प्रामाण्यनुमाय, तत्प्रणेतुरतीतार्थदर्शित्वेन परमाप्तत्वमवधार्य, तत्प्रणीताना सर्ववाक्यानामप्रामाण्ये कारणाभावात, प्रामाण्यमनुमीयते ॥

यद्यपि सर्ववेदवाक्याना प्रवृत्तिसामर्थ्य न घटते तथापि तदेकदेशभूताना पुत्रकामो यजेत, पशुकामो यजेत, कारीर्या वृष्टिकामो यजेतेत्यादिवाक्याना तावत् प्रवृत्तिसामर्थ्यात्प्रामाण्यमनुमीयते । न च वक्तव्यं वर्तितायामपीष्टौ पुत्राद्दर्शनात्तेषामप्रामाण्य युक्तमिति । बाहुल्येन फलोपलम्भात् । क्वचिदनुपलम्भ तु कर्मकर्तृवैगुण्यमेव कल्प्यताम्, न पुनर्वाक्यस्याप्रामाण्यम् । किंच शान्तिकपौष्टिकादिकर्मणा वैदिकाना प्राचुर्येण फलोपलम्भात्तदभिधायिवाक्याना प्रामाण्यसिद्धेस्तत्प्रणेतुरतीन्द्रियार्थद्रष्टृत्वमपि सिद्ध्यति । न तत्कर्मणा तत्फलाना वाऽपरिमिताना साध्यसाधनभावमस्मदादिरसर्वज्ञः प्रतिपत्तुमुपदेष्टु वा समर्थः । ननु बौद्धाद्यागमानामप्येकदेशसवादोऽस्तीति प्रामाण्यप्रसग इति । तत्परिहारायोक्तमप्रामाण्ये कारणाभावादिति । बौद्धादिवाक्याना तु सर्व क्षणिक शून्यमित्येवमादीना भूयसा बाधकमुपलभ्यत इत्यप्रामाण्यमेव युक्तमिति भावः । तत्रातीन्द्रियैकदेशसवादस्तु वेदमूलत्वादभ्युपपद्यत इति । न च वैपरीत्यमाशङ्कनीयम् । तत्नानभिहिताना शान्तिकपौष्टिकादिजातिविभागकर्मणामनन्ताना वेद एवोलम्भात् ।

१ ग. घ. read before पुत्रकामो–कारीरीं निर्वपेत् वृष्टिकामः ।

आपणे क्रीयमाणाना रत्नानामुपलम्भनात् ।
नहि तन्मूलताशङ्का रत्नाकरमहानिधेः ॥
नन्वेव पौरुषेयत्वात् प्रामाण्यप्रतिपादने
रागद्वेषादि कालुष्य पुरुषेषूपलभ्यते ॥
अतोऽप्रामाण्यशङ्काऽपि निष्कलङ्का प्रसज्यते ।
वेदे प्रमाणता तस्मान्नित्यत्वेनाभ्युपेयताम ॥

इत्याशङ्कयाह । न नित्यत्वेन ॥

नहि नित्यत्वाद्वेद प्रमाणमिति वक्तु शक्यते । श्रोत्रान्तःकरणादीना नित्यत्वेऽपि सशयविपर्ययोत्पादनदशायामप्रमाणत्वेनानैकान्तिकत्वात् । नित्यत्वे सति,पुरुषदोषादीनामननुप्रवेशादप्रामाण्यशङ्कानिवृत्तौ.वेदप्रामाण्य स्वत एवेति चेत्, न । वेदस्य विशिष्टज्ञानसाधनत्व प्रामाण्य । तच्च न स्वतः, समयग्रहणापेक्षणात् । अन्यथा व्याकरणादिव्युत्पत्तिरहिताना वेदश्रवणमात्रादर्थप्रतिपत्ति प्रसगः । अथ तज्जनितस्य ज्ञानस्य प्रामाण्य स्वतस्तत्रापि स्वत इति कोऽर्थ' किमुत्पत्त्यपेक्षया ज्ञप्त्यपेक्षया वा । न तावत्कार्यस्य कस्यापि स्वत उत्पत्तिर्दृष्टा । अथ सम्यङ्मिथ्योबोधसाधारणकारणातिरिक्तानपेक्षया जायमानत्व स्वतस्त्व, न । प्रमाणाभावात् । विपर्यये तु, प्रमाण. सम्यङ्मिथ्योबोधसाधारणकारणातिरिक्तकारणसहिताज्जायते । साधारणेषु सत्स्वप्यनुत्पद्यमानत्वात् । न चाऽसिद्धो हेतुः । मिथ्याज्ञानोत्पत्तिसमये साधारणकारणसद्भावेऽपि प्रमाणानुत्पादनात् । नापि स्वत एव ज्ञप्तिः ,ज्ञानस्य स्वसवेद्यत्वासिद्धे , भाट्टैरनभ्युपगमाच्च,अर्थप्राकट्यान्यथानुपपत्त्या बोधः सिध्यति । अथ यया जायते ज्ञान तयैव सामग्र्या प्रमाणमित्येव ज्ञायमानत्वात्स्वत'प्रामाण्यमिति, तन्न, असिद्धत्वात् । न हि यथाकथंचिदपि ज्ञायमानो बोध. प्रमाण ज्ञायते, मिथ्याबोधस्यापि तथाप्रतीतिप्रसगात् , क्वचिद्बोधे सम्यङ्मिथ्या वेति सशयाच्च । प्रामाण्य परतो ज्ञायते । अनभ्यस्तदशाया संशयविपर्ययत्वात् , अप्रामाण्यवत् । अथ नित्यत्वेनाप्रामाण्यशकाया निवृत्तौ पश्चात्प्रवृत्तिसामर्थ्येन महाजनपरिगृहीतत्वेन वा वेदस्य प्रामाण्य सिध्यतीति चेत् । एतत्पौरुषेयत्वेऽपि समानम् । न चाप्रामाण्यशकानिरासार्थं प्रमाणान्तरयोगः, प्रामाण्यसाधकादेवाप्रामाण्यशकाया अपि निराससिद्धेरित्यलम । नापि नित्यत्वे प्रमाणमस्तीत्याह ।

वाक्यानां हि नित्यत्वे प्रमाणाभावात् । अनित्यत्वे पुनर्वाक्यत्वाद्यनेकमनुमानम् ॥

हिशब्दश्चार्थे दूषणान्तरसूचने । पदरचनात्मक हि वाक्य । न च तन्नित्यत्वे प्रमाणमस्ति । नित्यानि वेदवाक्यानि । सम्प्रदायाविच्छेदकत्वे सति, अस्मर्यमाणकर्तृकत्वादाकाशवदिति चेन्न ,साधनविकलत्वाद् दृष्टान्तस्य । सम्प्रदायाविच्छेदो हि वृद्धपरपरया यावद्वाक्यस्यानुवर्तनम्, न च तादृशमाकाशस्य सभवति । किंच 'यो धर्मशीलो जितमानरोष' इत्यादिवाक्यानां बहूनामपि संप्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वमस्ति न च नित्यत्वम्, इति व्यभिचारः । ननु नेदमनुमान किं त्वर्थापत्तिः । तथाहि यदि वेदः पौरुषेयः स्यात्तदा तदभिहितकर्मणा संध्यावदनादीना बहुवित्तव्ययायाससाध्याग्निहोत्रादीना चानुष्ठानकाले कर्तु' स्मरणे सति तत्प्रत्ययादेव प्रवृत्ति' स्यात्, नच तदस्ति, अतोऽवश्य स्मरणयोग्यस्याप्यस्मरणान्यथानुपत्त्या वेदाना नित्यत्वमिति । तन्न । विशिष्टवृद्धपरपरानुष्ठानप्रत्ययादेव कर्त्रस्मरणेऽपि भविष्योत्तरादिष्टवृत्तेष्विव प्रकृत ईक्षणार्था प्रवृत्ति' । वेदवाक्यानि पौरुषेयाणि । वाक्यत्वात्कालिदासवाक्यवत्, रचनारूपत्वाद्वा तन्त्ररचनावत् । पौरुषेयत्व साक्षात्परम्परया वा स्वतत्रपुरुषपूर्वकत्व साध्यमतो न सिद्धसाधनम् । स्वातंत्र्य च तादृशरचनान्तरानुसन्धानशून्यस्य विशिष्टरचनाहेतुत्वम् । तच्च 'सर्वथा प्रतिषेध्या न पुरुषाणा स्वतन्त्रता' इतिवदद्भि' श्रोत्रियैरप्यङ्गीकृतमन्यत्रेत्यलम् ।

दूषणान्तरमाह ।

सर्वदोपलब्ध्यनुपलब्धिप्रसंगश्च । विपर्यये नियामकाभावादिति ॥

वैदिकवाक्याना सर्वपदाना च नित्यत्व इति शेषः । यदीन्द्रियग्रहणयोग्यत्व, तदा सर्वशब्दाना नित्यत्वे व्यापकत्वेनेन्द्रियसबधाना सर्वदोपलब्धिप्रसंगः । अयोग्यत्वेन वा परिमाण्वादीनामिव सर्वदानुपलब्धिप्रसगः, विपर्यये कदाचिदुपलम्भलक्षणे नियामकस्य कारणस्याभावात् । परमतमाशङ्कते ।

अभिव्यंजकाभावात् तदनुपलब्धिरिति चेत् ॥

सद्भावे तु कदाचिदुपलब्धिरित्यर्थः । दूषयति ।

न । तदनिर्देशात् ॥

तस्याभिव्यञ्जकस्यानिर्देशादकथनाद्विशेषेणेति शेषः । पुनः परमतमाशङ्कते ।

वायुसंयोगविभागाविति चेत् ॥

वक्तुस्ताल्वोष्ठपुटादिव्यापारात्प्रेरितो विशिष्टो वायुरागत्य श्रोतुः श्रोत्रदेशेन यदा संयुज्यते तदा शब्दोपलब्धिः[1], यदा तु न संयुज्यते तदा शब्दानुपलब्धिः । अथवा व्यञ्जकवायुना संयोगः शब्दावारकस्तिमितवायुना च विभागस्तदभिव्यञ्जकत्वादित्यर्थः ।

परिहरति ।

न । सर्वशब्दानां युगपद्ग्रहणप्रसङ्गात् ॥

प्रत्यवतिष्ठते ।

कथम् ॥

न हि रूपाद्यभिव्यञ्जकतेजःसंयुक्तेन चक्षुषा सर्वेषां रूपाणां युगपद्ग्रहणं दृष्टमिति भावः । युगपच्छब्दानां ग्रहणप्रसङ्गं समर्थयितुमाह ।

अत्र तावत्समानेन्द्रियग्राह्यसमानदेशार्थग्रहणाय प्रतिनियतसंस्कारसंस्कार्यं न भवति, इन्द्रियत्वाच्चक्षुर्वदिति ॥

इन्द्रियत्वादिति हेतुर्मनसा सनाद्यावेनैकान्तिक । अत समानेन्द्रियग्राह्येति विशेषणम् । तथापि भिन्नदेशावस्थितरूपादिग्रहणाय चक्षुः प्रतिनियतप्रदीपादिसहकारणमपेक्षत इत्यनैकान्तिकः, तन्निरासाय समानदेशग्रहणम् । समानदेशत्वं च युगपदिन्द्रियसम्बन्धत्वं विवक्षितम् । ननु तथापि शुक्लकृष्णरूपग्राहकचक्षुषा व्यभिचारः, शुक्लरूपं हि मन्दालोकवता चक्षुषा गृह्यते कृष्णं तु प्रचुरालोकवतेति, तन्न, प्रचुरालोकसहितेन चक्षुषा शुक्लकृष्णयोरुभयोरपि ग्रहणात् प्रतिनियतसंस्कारसंस्कार्यत्वासिद्धेः । अन्ये त्वस्य चोद्यस्य परिहारार्थं समानधर्मापन्नानामिति विशेषयन्ति[2] तत्त्वयुक्तम् । सर्वशब्दानां समानधर्मत्वाभावेन सिद्धसाध्यत्वप्रसङ्गात् । एतच्च श्रोत्रसंस्कारपक्षेऽनुमानमुक्तं, विषयभूतशब्दसंस्कारपक्षे तु दूषणमाह ।

---

[1] घ. उपलब्धि ।

[2] क. ग. घ ङ. च. read समानदेशसमानधर्मापन्नानाम् ।

शब्दा वा प्रतिनियतसंस्कारसंस्कार्यो न भवन्ति । समानेन्द्रिय-ग्राह्यत्वे सति, युगपदिन्द्रियसंबद्धत्वाद्घटवत् ॥

युगपदिन्द्रियसबद्धत्वादित्युच्यमाने रूपरसगन्धस्पर्शैर्व्यभिचारस्तेषामेकद्रव्यसमवेताना युगपच्चक्षुःसबद्धत्वेऽपि प्रदीपपदार्थान्तर्गतोदकतैलवायुविशेषैर्यथासख्य सस्कार्यत्वाद्, अतः समानेन्द्रियग्राह्यग्रहणम् । समानधर्मग्रहण यदि (हेतुविशेषण [१]) स्याद्विशेषणासिद्धो हेतुः स्यात्, यदि पुनः शुक्लकृष्णरूपवदुज्ज्वलानुज्ज्वलरूपरहितत्वमेव समानधर्मापन्नत्व विवक्षित न पुनः सर्वथा साम्यमिति तदा निर्दिष्टो हेतुरिति । एतच्चानुमान परैः प्रसगसाधनस्याङ्गीकरणादुक्त, अन्यमते युगपदिंद्रियसबद्धत्वमासिद्धमेव । परमतमाशङ्कते ।

उत्पत्तिपक्षेऽप्ययं समानो दोष इति चेत् ॥

वायो. शब्दोत्पादकत्वाभ्युपगमेऽप्येकोत्पादकः सर्वोत्पादक' स्यात् । अथ नियतैकवर्णेच्छया प्रेरितो वायुस्तमेव करोति नान्यमिति चेत्, व्यजकत्वेऽपि समानम् । तदुक्त भट्टाचार्यैः ।

" अन्यार्थ प्रेरितो वायुर्यथान्य न करोति वः ।
तथान्यवर्णसस्कारशक्तोऽन्य न करिष्यति " ॥ परिहरति

न । मृत्पिण्डप्रदीपदृष्टान्ताभ्यां कारकव्यंजकवैधर्म्यसिद्धेरित्यलमतिप्रसंगेन ॥

एको हि मृत्पिडः कर्तुरिच्छावशेन घटाद्यन्यतमकार्यमारभते व्यञ्जकस्तु प्रदीपो घटप्रकाशेच्छया प्रेरित' स्वसयुक्त पटादिकमपि प्रकटयत्येवातो न कारकव्यञ्जकयो' साम्यमिति । इदानी प्रागुक्तसकलशास्त्रार्थमुपसंहर्तु प्रमाणानामन्तर्भाव दर्शयति ।

एवमेतानि त्रीण्येव प्रमाणानि । एतेष्वेवोपमानार्थापत्तिसंभवैतिह्याभावादीनामन्तर्भावः ॥

---

[१] ग. reads समानेन्द्रियग्राह्यसमानदेशसमानधर्मापन्नत्वे सति ।

[२] च. सस्कार .

आदिशब्देन चेष्टालिप्यक्षरयोः स्वीकारः । वृद्धनैय्यायिकाभिमतमुपमानमन्तर्भावयति ।

तत्र यथा गौरेवं गवय इत्युपमानं शब्देऽन्तर्भूतम् ॥

अदृष्टगवयेन गवयार्थिना नागरिकेण कीदृग्गवय इति पृष्टो वनेचरः प्राह यथा गौरेव गवय इति । एतत्किल वाक्यं गवोपमानेन गवयं ज्ञापयत् पृथक्प्रमाणमिति, तच्चायुक्तम् ।

दीर्घग्रीवः प्रलम्बोष्ठश्चतुष्पाद्विकृताकृतिः ।

उष्ट्र इत्यादि वाक्यस्य पृथक्प्रामाण्यशक्तितः ॥

मीमांसकाभिमतमुपमानमाशङ्कते ।

अनेन सदृशी मदीया गौरित्युपमानमिति चेत् ॥

अटव्यामटत पुरुषस्य गोसदृशपिण्डोपलम्भान्मदीया गौरनेन सदृशीति ज्ञानमुपजायमानं न तावत्प्रत्यक्षं गोपिण्डस्य तदेन्द्रियासन्निकृष्टत्वात्, नापि स्मरणं गवयसादृश्यावच्छेदेन पूर्वं ग्रहणाभावात्, नाप्यनुमानं लिङ्गाभावात्। इयं गौरनेन सदृशी, अस्य तत्सदृशत्वादित्युच्यते तदा व्यधिकरणासिद्धहेतुः। अनुपपद्यमानार्थाऽसम्भवाच्च नार्थापत्तिः । शब्दाभावयोश्चासम्भवादुपमानमेवेति भावः । परस्य दूषयति ।

न । तस्य स्मृतित्वात् । पूर्वमेव हि सादृश्यविशिष्ट उपलब्धो गोपिण्डः । कस्मात्, उपलब्धियोग्यत्वात् । अयोग्यत्वे वा न कदाचिदुपलभ्येतादृष्टवत् ॥

भूयोऽवयवसारोप्यं हि गोर्गवयेन सादृश्यं । तच्चेन्द्रियग्रहणयोग्यत्वादाश्रयग्रहणकाल एव गृहीतम् । प्रतियोगिग्रहणप्रतिबुद्धसंस्कारस्य स्मरणमेवोत्पद्यते । पूर्वमेव च गवयसदृशी गौरुपलब्धा । किमिति तथा निश्चयो न भवतीत्याशङ्क्याह ।

निर्विकल्पकेन तु पूर्वं सादृश्यमुपलब्ध, तेन तदोपलब्ध्यभिमानो न भवति ॥[2]

---

१ ग. adds सादृश्यस्य after योग्यत्वात्

२ ग. घ. add प्रथमगोपिण्डोपलम्भकलिङ्गत्वोपलम्भात् ।

तर्हि निश्चयात्मिका कथ पश्चात्स्मृतिः स्यादनुभवाकारधारित्वात्स्मृतेरित्यत्राह ।

निर्विकल्पकोपलंभाच्च संस्कारसहकारिसामर्थ्यादभावादिषु सविकल्पिका स्मृतिर्दृष्टेति ॥

इदानीं जरन्नैय्यायिकोपमानमनूद्य दूषयति ।

संज्ञासंज्ञिसंबंधप्रतिपत्तिरप्याप्तवचनकार्या ॥

गोसदृशो गवय इत्यतिदेशवाक्य श्रुतवतोऽटव्यामटतो गोसदृशपिण्डदर्शनानन्तरमयं गवयनामेति सज्ञासज्ञिसबधप्रतिपत्तिरुपपद्यमानोपमानफल, गोसादृश्यविशिष्टपिण्डदर्शन च प्रमाणमित्याचार्या उद्योतकारादयो मन्यन्ते । तच्चायुक्तम् । आप्तवचनादेवातिदेशरूपात्पूर्वमेव सज्ञासज्ञिसबधज्ञानस्योत्पद्यमानत्वात् । अत्रार्थे प्रमाणमाह ।

तथा प्रश्नोत्तराभिधानादन्यप्रमाणानिर्देशाच्च ॥

कथ त्व जानीषे गवयनामोऽयमिति केनचिदुक्त[१], स तु वनेचरवचनादिति ब्रूते न पुनरुपमानेन जानामीति प्रमाणान्तर निर्दिशति । तत्रापरमतमाशङ्कते ।

अस्य गवयशब्द संज्ञेति प्रतिपत्तावुपमानासिद्धिस्तथा शब्दाश्रवणादिति चेत् ॥

गोसदृशो गवय इति वनेचरवचनाद्गवयस्य गोसादृश्यमात्र प्रतीयते, पश्चात्तत्सादृश्यविशिष्टपिण्डदर्शने सत्यस्य पिण्डस्य गवयशब्दः सज्ञेति प्रतिपत्तौ प्रमाणान्तरभावादुपमानमेव द्रष्टव्य । कस्मात् । तथास्य गवयशब्दः सज्ञेतिप्रकारेण शब्दस्य पूर्वमश्रवणात् । परिहर्तुमतिप्रसग तावद्दर्शयति ।

एवं तर्हि गौरयमित्येव संकेते कृतेऽस्य गोशब्दःसंज्ञेति प्रतिपत्तौ प्रमाणान्तरं वाच्य । समानन्यायत्वाद् । गोपिण्डान्तरेऽपि संकेतग्रहणे प्रमाणान्तराभिधानप्रसंग इति ॥

---

१ ग. and घ. drop सत्कार.

यस्मिन्पिण्डे सकेतोऽन्यवचनाद्गृहीतः ततोऽन्यो गोपिण्डो गोपिण्डान्तर तस्मिन् । इदानीमतिप्रसङ्गे परेणाभिधीयमान परिहार स्वपक्षेऽपि समीकर्तुमाशङ्कते ।

तथाशब्दानभिधानेऽपि प्रतिपादकप्रतिपत्त्रोरेवमेवाभिप्रायः, ईदृशस्य सर्वस्य गोशब्दः संज्ञेति सामर्थ्यात्त्वेवं प्रतिपत्तिरिति चेत् ॥

तथाशब्दानभिधानेऽपि एवजातीयस्य गोशब्दः सज्ञेति शब्दानुच्चारणेऽपि सामर्थ्यमूहनशक्तिरदृष्टवेदेषे । परोक्त परिहार स्वपक्षेऽपि योजयति ।

न । समानमेतदत्रापि, गोसदृशो गवय इति शब्दादुभयोरेवमेवाभिप्रायः, गोसदृशस्यार्थस्य गवयशब्द सज्ञेति सामर्थ्यादेव प्रतिपत्तिरिति ॥

ननु वनेचरवचनोच्चारणकाले गवयस्याप्रत्यक्षत्वात्कथ तत्र सज्ञाकरण "प्रत्यक्षे संज्ञाकर्म" इति सूत्रविरोधादित्याशङ्क्याह ।

न च प्रत्यक्ष एवार्थे सज्ञासज्ञिप्रतिपत्तिः, अप्रत्यक्ष शब्दादौ सज्ञासज्ञिसबंधप्रतिपत्तिदर्शनात् ॥

देवानामधिपतिः सहस्राक्षो यः स शक्र इति सज्ञाऽप्रत्यक्षेऽपि शक्रादौ दृष्टा । तथा पुत्रादौ प्रमाणावगत दूरस्थेन पित्रा सज्ञाकरणमपि दृष्टम् । "प्रत्यक्षे संज्ञाकर्म" इति प्रत्यक्षशब्दो दृढप्रमाणोपलक्षणपर इति वैशेषिकैरेव व्याख्यातम् । तर्हि प्रत्यक्षानुमानोपमानशब्दा प्रमाणानीति प्रमाणविभागसूत्रविरोध इत्याह ।

सूत्रविरोध इति चेत् ॥

परिहरति ।

न । प्रमाणनिग्रहस्थानाभ्या दृष्टान्तहेत्वाभासादीनामिव प्रयोजनवशेन पृथगभिधानादिति ॥

प्रमाणप्रमेयेत्यादिप्रथमसूत्रे प्रमाणान्तर्भूतस्य दृष्टान्तस्य, निग्रहस्था-

नान्तर्भूतहेत्वाभासाना यथा प्रयोजनविशेन पृथगभिधान तथा शब्दान्त-र्भूतस्याप्युपमानस्य प्रयोजनवशेन पृथगभिधानमिति । पृच्छति ।

तर्हि प्रयोजनं वाच्यं । उच्यते । शब्दप्रामाण्यसमर्थनं प्रयोजनम् ॥

पुनः प्रत्यवतिष्ठते ।

कथम् ॥

अयमभिसंधिः, " तदप्रमाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः " (गौ. सू. २-१-५६), इति पूर्वपक्षसूत्रे, "न कर्तृकर्मसाधनवैगुण्यात् " (गौ. सू. २-१-५७), "अभ्युपेत्य कालभेदे दोषवचनात्" (गौ. सू २-१ ५८), " अनुवादोपपत्तेश्चेति " (गौ. सू २ १-५९), सूत्रेपु वा शब्दप्रामाण्य-समर्थनार्थेषु नोपमानस्योपयोगः श्रूयते तत्कथ पृथगभिधानस्यैतत्प्रयोजन स्यादिति । प्रकारान्तरेण शब्दप्रामाण्यसमर्थनार्थत्वमुपमानस्य दर्शयिष्यन्परा शङ्का तावद्दर्शयति ।

केचिदाहु· प्रत्यक्षानुमानविषयत्वे शब्दस्यानुवादकत्वमेव[1] । तद-विषयत्वे संबंधाग्रहणादवाचकत्वमिति ॥

प्रत्यक्षानुमानस्य विषय एव विषयो यस्यासौ प्रत्यक्षानुमानविषय· । एकस्य विषयशब्दस्य लोपेन समास· । अनुवादकत्व प्रमाणान्तरगृहीतवि-षयत्व । तच्च स्मृतिवदप्रमाण स्यादित्यर्थः । पदैनैवार्थाभिधायित्वे पदसकेत उच्यतामित्याशङ्क्याह

पदार्थस्याप्रसिद्धत्वात् । न च पदेन सम्बधग्रहणामितरेतराश्रयत्व-प्रसंगात् ॥

पदेनार्थाभिधाने सबधग्रहणं तद्ग्रहणे च पदेनार्थाभिधानमिति । नान्यो वापि सबधो, ग्रहीतुमशक्यत्वादिति दर्शयति ।

वाक्यार्थस्तु प्रसिद्धानां पदार्थानामन्वयमात्रमिति ॥

पद्यन्ते ज्ञायन्ते इति पदार्थास्तेषा पदार्थानामित्यर्थः, किंविशिष्टाना, प्रसि-

---

१ ग. ङ. add अनुवादक चाऽप्रमाणम् after एव ।

द्धानां पदैरभिहितानां अन्वयमात्र वाक्यार्थः । एवं च संबंधाग्रहणे पदार्था-प्रसिद्धिः तदप्रसिद्धौ वाक्यार्थाप्रसिद्धिरिति कथं वाक्येन संबंधग्रहणमित्यर्थः। एवं परोक्तदूषणमनूद्येदानीं तत्परिहार उपमानस्योपयोगमाह ।

तन्निराकरणार्थमुपमानं निदर्शनार्थत्वेन पृथगुक्तम् । यथा कार्यार्थिनो ऽप्रसिद्धगवयस्य प्रसिद्धगोसादृश्यमुपादायोपमानाख्येन वाक्येन संज्ञा-संज्ञिसंबंधप्रतिपत्तिः क्रियते तथा किंचिन्निमित्तमुपादाय शक्रादि-पदपदार्थयोरपीति तस्मादन्यार्थत्वान्न सूत्रविरोधः ॥

किंचिन्निमित्त सहस्राक्षत्व देवानामधिपतित्वमुपादाय शक्रादिपदपदार्थ-योरपि संज्ञासंज्ञिसंबन्धप्रतिपत्तिः क्रियत इत्यनुवर्तते । ननूपमानस्य पृथक्-प्रामाण्याभावे "अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः", (गौ. सू. २-१-४२) "प्रसिद्धिसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः" (गौ. सू. २-१-४३) इति सूत्राभ्या सूत्रकारेणाप्रामाण्यशङ्कापूर्वकं प्रामाण्यसमर्थनं किमर्थं कृतमित्याशङ्क्याह ।

परीक्षा त्वर्थापत्तिवत्प्रमाणस्य सतः प्रमाणेष्वन्तर्भावज्ञापना-र्थमिति ॥

ननूपमानस्याप्यन्तर्भावमाशङ्क्य परिजहार सूत्रकारः । उपमानमनुमानं "प्रत्यक्षेणाप्रत्यक्षसिद्धेः", (गौ सू. २-१-४४) परार्थमनुमानमिति चेन्न स्वयमप्यध्यवसायात, "तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः",(गौ सू. २-१-४६) इति तस्मात्कथमन्तर्भावसूत्रविरोधो न भवतीत्याशङ्क्याह ।

अन्तर्भावस्त्वनुमान एवास्य यथाश्रुतोऽपि निराकृतो नागम इति॥

यथाश्रुतोऽपि निराकृतोऽपीति संबन्धः । "न चतुष्ट्वमैतिह्यार्थापत्तिसंभवा-भावप्रामाण्याद्(गौ सू.२-२-१)" इत्यादिसूत्रेषु प्रमाणचतुष्ट्वश्रवणान्नित्व सूत्र-विरुद्धमित्याशङ्क्याह ।

चतुष्ट्वाभिधानं सूत्रेषु पञ्चत्वादिनिराकरणार्थं न त्रित्वप्रतिषे-धार्थं, प्रमाणसिद्धत्वादन्तर्भावस्य ॥

परमतमाशङ्कते ।

त्रित्वानभिधानादयुक्तमिति चेत् ॥

यदि सूत्रकारः प्रमाणत्रित्वमेवाभ्युपागमिष्यत्तदा क्वचिदभ्यधास्यत् । न चाभ्यधात्तस्मादयुक्तमेतदिति । परिहरति ।

न । अस्य सूत्रकारस्यैवंस्वभावत्वाद्यत्सिध्दान्तमपि क्वचिन्नाभिधत्ते । यथा कृत्स्नैकदेशविकल्पादिनावयविनिराकरणे ॥

कुत एवमभिधानमित्यत्राह ।

शिष्याणामूहनाशक्त्यतिशययुक्तानामधिकार इति ज्ञापनार्थम् ।

उपसंहरति ।

तस्मात्स्थितमुपमान शब्देऽन्तर्भूतमिति । अर्थापत्तेरप्यनुमानेऽन्तर्भावः । अविनाभावबलेनैवार्थप्रतिपत्तिसाधनात् ॥

अनुमापकधूमवदिति शेषः । अविनाभावमेव दर्शयति ।

अन्यथा नोपपद्यत इत्युक्ते सत्येवमुपपद्यत इति लभ्यते । अयमेवाविनाभाव इति ॥

परमतमाशङ्कते ।

यत्र सामान्याकारेणान्वयग्रहणं नास्ति यथा मुख्यकारणत्वाप्रतिबन्धशक्त्योस्तत्रार्थापत्ति. पृथक्प्रमाणामिति चेत् ॥

मुख्यकारणत्व नाम सकलसहकारिसाकल्य यदनन्तरमेव कार्योत्पत्तिः । सहकारिणो दृष्टादृष्टरूपाः । न च तेषां साकल्य क्वचिदप्यस्मदादिप्रत्यक्ष, किन्तु कार्यैकसमधिगम्यम् । तथा वह्न्यादीनां दाहकत्वादिशक्तेः प्रतिबन्धकाभावोऽपि न प्रत्यक्षः । प्रतिबन्धकानां मणिमन्त्रादीनामनन्तत्वेन तदभावस्याप्यसख्यातत्वात् । अतो मुख्यकारणत्वाप्रतिबन्धशक्त्योः सामान्याकारेणान्वयग्रहणाभावादनुमानासम्भवेऽर्थापत्तिरेव प्रमाणमित्यर्थः । परिहरति ।

न । तत्रापि केवलव्यतिरेक्यनुमानाव्यतिरेकात् । केवलव्यतिरेकी अर्थापत्तिरिति संज्ञाभेदमात्रम् ॥

प्रयोगस्तु, कार्योत्पत्तेः पूर्वक्षणे कारणानि सकलसहकारिसमवेतानि सकलप्रतिबन्धकशून्यानि वा,अनन्तरमेव कार्योत्पादकत्वात्। यानि पुनरेवं न भवन्ति न तान्यनन्तरमेव कार्योत्पादकानि, यथा केवलतन्तवो मणिप्रतिबद्धो वह्निर्वा।

अन्वयाभावान्नैतदनुमानमिति चेत्। न। केवलान्वयिनो हि व्यतिरेकाभावेन प्रमाणान्तरत्वप्रसंगादिति ॥

स्पष्टम्।

अपि च प्रत्यक्षादिभेदानां केनचिद्वैधर्म्येण भेदात्प्रमाणान्तरत्वप्रसङ्गादिति ॥

सविकल्पकनिर्विकल्पकभेदेन योग्ययोगिप्रत्यक्षभेदेन वा द्विविधं प्रत्यक्षम्। कार्यकारणानुभयात्मकं त्रिविधमनुमानम्। दृष्टादृष्टार्थभेदेन द्विविधः शब्द इति।

उपसंहरति।

तस्मादविनाभाववशेनार्थप्रतिपादकत्वादर्थापत्तिरनुमानमिति ॥

केनचित्सहस्रमेतदिति कथिते, शतमत्र सम्भवतीति ज्ञानं संभवाख्यं प्रमाणमिति केचिदाहुः। तन्निराकरोति।

बहुत्वसंख्याविषयत्वे सति अल्पसंख्याविषयस्य सर्वत्रोपलम्भात्रानुमानात्संभवो भिद्यत इति ॥

प्रयोगस्तु, विवादपदं सहस्रं स्वसमुदायिशतवृत्ति। सहस्रत्वात्पूर्वगणितसहस्रवत्।

अभावस्य तु त्रिष्वपि यथासम्भवमन्तर्भावः। तथाहि कौरवाद्यभावप्रतिपत्तिरागमादिति ॥

व्यासाद्याप्तवचनात्। अभावप्रत्यक्षत्वे वक्तव्ये विप्रतिपन्नैर्बहुवक्तव्यतया व्यत्ययेनान्तर्भावो निरूपितः।

आत्मादिषु रूपाद्यभावप्रतिपत्तिरनुमानादिति ॥

आत्मा रूपरहितो नियमेनाचाक्षुषप्रत्यक्षत्वाद्वायुवत्। गन्धरसरहितो, रूपरहितत्वाद्वायुवत्। स्पर्शरहितोऽस्मदादिमानसप्रत्यक्षत्वात्सुखादिवत्। आकाश रूपरसगन्धशून्य स्पर्शरहितत्वादात्मवदित्याद्यूह्यम्।

भूतलादिषु घटाद्यभावप्रतिपत्तिः प्रत्यक्षात्। इन्द्रियव्यापारभावभावित्वादिति ॥

इन्द्रियव्यापारस्य भाव एव भवतीत्येवंशीलमिन्द्रियव्यापारभावभावित्वस्य भावस्तत्त्वम् तस्मात्। तथाहि घटशून्य भूतलमित्यादिज्ञानमिन्द्रियजम्, इन्द्रियान्वयव्यतिरेकानुविधायित्वात्, रूपादिज्ञानवत्। चोदयति।

अन्यत्र तद्भावभावित्वं पर्यवसितमिति चेत् ॥

अन्यत्रेत्याधारभूतलादिग्रहणम्। तथा चोक्तम्।

गृहीत्वा वस्तुसद्भाव स्मृत्वा च प्रतियोगिनम्।
मानस नास्तिताज्ञान जायतेऽक्षानपेक्षया ॥

इति। परिहरति।

न। रूपादिष्विव बाधकाभावादिति ॥

न हि रूपाद्याश्रयग्रहण एवेन्द्रियव्यापार पर्यवसितो, न रूपादिष्विति युक्तम्। घ्राणव्यापारे सत्येव निर्गन्ध कुसुममिति ज्ञानमुत्पद्यते। न च तत्रेन्द्रियव्यापारोऽन्यत्र पर्यवसित इति युक्त वक्तुम्। द्रव्यस्य चाक्षुषज्ञानविषयत्वात्।

संबन्धाभावो बाधक[1] इति चेत् ॥

न ह्यभावेन इन्द्रियसयोगः समवायो वा सभवतीति भावः। परिहरति।

न। स्वपक्षपरपक्षयोरसिद्धत्वात् ॥

मीमासकस्य पक्षोऽत्र स्वपक्षः। एतदेव विवृणोति।

स्वपक्षे तावद्रूपादिष्विवापरोक्षानुभवकार्यानुमेयो योग्यताख्यः संबंधः। परपक्षेऽपि संयुक्तविशेषणभावादिरिति ॥

आदिशब्देन सयुक्तविशेष्यभावादीना प्रत्यक्षपरिच्छेदोक्ताना स्वीकारः।

---

१ घ. reads बोधक.

संयोगसमवायरहितस्य विशेषणविशेष्यभावानुपपत्तिरिति चेत् । न। विशिष्टप्रत्ययेन तत्सिद्धेरिति ॥

गोमान्धनवानित्यादिर्विवेति भावः । ऐतिह्यमन्तर्भावयति ।

अनिर्दिष्टप्रवक्तृकं प्रवादपारंपर्यमैतिह्यमागमेऽन्तर्भूतम् ॥

अनिर्दिष्टोऽनिश्चित प्रवक्ता द्रष्टृत्वेन मूलभूतो यत्र तदनिर्दिष्टप्रवक्तृकं प्रवादपारंपर्यम्। सत्य चेदिति शेषः। असत्य चेद प्रमाणम् । एतदुदाहरति ।

यथेह वटे यक्ष प्रतिवसतीति ॥

चेष्टा नाम प्रमाणान्तरमिति केचित् । अनुमानेऽन्तर्भूतेति चापरे । तदुभयमपि चेष्टालक्षणपूर्वकं निषेधयति ।

प्रयत्नजनिता शरीरतदवयवक्रिया चेष्टा । सा च नाट्यशास्त्रादिसमयबलेन पुरुषाभिप्रायविशेषमर्थविशेष च गमयतीति नागमाद्भिद्यते, लिप्यक्षरादर्थप्रतिपत्तिवदिति ॥

प्रयत्नजनितेत्यनेन वाय्वादिविकारजनितहस्तादिकम्पव्यवच्छेद. । नाट्यशास्त्रादीत्यादिशब्दाल्लोकव्यवहारपरिग्रह. । क्रियेत्युपलक्षणम् । संयोगेनाप्यर्थप्रतीतिदर्शनात् । हस्तमुखसंयोगविशेषाभ्या पिपासाबुभुक्षाप्रतिपत्ति । लिपिरेवाक्षरं तस्मादिति चेष्टायाः प्रमाणान्तराभ्युपगमे लिप्यक्षराणामपि प्रमाणान्तरत्वप्रसग इति सूचितम । न च वक्तव्यम् लिप्यक्षरानुमिताक्षरेभ्यर्थप्रतिपत्तिरिति क्रमेण, प्रमाणाभावात् ,चेष्टातो वा तथाप्रसगात्।उपसहरति।

तदेवं व्यवस्थितम् । एतानि त्रीणि प्रमाणानीति ॥

प्रमाणज्ञानमात्रमेव नापूर्वसाधनं किंतु तेन प्रमेयं किंचिद्वस्तुतत्वम तच्च किं स्यादित्यभिप्रायेण पृच्छति ।

किं पुनरेभिः प्रमाणैः प्रमातव्यमिति ॥

उत्तरमाह ।

[१] ग. adds after this इति तृतीयोऽयमागमपरिच्छेदः ।

उच्यते । प्रमेयमिति । किंलक्षणमिति ॥

यद्यपि पूर्वं प्रमाविषय प्रमेयमिति लक्षणमुक्त तथापि न प्रमेयसामा न्यापेक्षयाऽय प्रश्न किंतु तद्विशेषापेक्षयेति न विरोध । उत्तरमाह ।

यद्विषय ज्ञानमन्यज्ञानानुपयोगित्वेनैव नि श्रेयससाधन भवति तत्प्रमेयम् । तदेव तत्वतो ज्ञातव्य सर्वदा भावयितव्य च । न तु कीटकसख्यादि । तज्ज्ञानस्यानुपयोगित्वादिति ॥

अन्यज्ञानानुपयोगित्वेनेत्यनेन प्रमाणाद्यवच्छेद । प्रमाणज्ञानस्यात्मादि ज्ञानोपयोगित्वेन नि श्रेयससाधनत्वात् । प्रमेय विभजते ।

तच्चतुर्विध । हेय तस्य निर्वर्तक, हानमात्यन्तिक, तस्योपाय इति ॥

यद्यपि सूत्रकारेण मशरीरेन्द्रियार्थबुद्धिमन प्रवृत्तिदोषप्रेत्यभावफलदु खापवर्गास्तु प्रमेयम् (गौ सू १-१-९) इति द्वादशविध प्रमेयमुक्त तथापि तस्य चतुधा भाव्यमानस्यैव नि श्रयस नि मित्तत्वमिति ज्ञापयितु सग्रहेण चातु र्विध्यमुक्तम् । चातुर्विध्यस्यापि स्वरूपमाह ।

तत्र हेय दु खमनागतम् (यो सू २ १६) ॥

हेय नामावश्य दु ख वन परित्याज्यम् । तच्चानागतमेव, अतीतस्योपभु क्तत्वाद्वर्तमानस्याप्युपभाग विना प्रकारान्तरेण परिहर्तुमशक्यत्वाद् । हेयमपि विभजते ।

एकविंशतिप्रकारम् । शरीर षडिन्द्रियाणि षड् विषया षड् बु द्धय सुख दु ख चेति ॥

घ्राणरसनचक्षुस्त्वक्श्रोत्रमनासि षडिन्द्रियाणि,गधरसरूपस्पर्शशब्दा बहि र्विषया ज्ञायमानतया सुखदु खहेतुत्वात्, मनोविषयस्तु स्मृतिसकल्पादिरि त्येके, निद्रालस्यकामादिरित्यपरे विषयाणामिन्द्रियाणा च षड्विधत्वाद् बुद्धयोऽपि षडित्युच्यन्ते । शरीरादीना सुखदु खादत्यन्तविलक्षणत्वात्कथ दु खशब्दवाच्यत्वमित्याशङ्क्याऽऽह ।

तत्र शरीरं दुःखायतनत्वाद्दुःखम् ॥

दुःखस्यायतनं गृह, शरीरावच्छिन्नात्मप्रदेशे हि दुःखमुत्पद्यते नान्यत्र। एतेनैव च विशेषेण ज्ञायमानतया दु खहेतुभ्यो विशेषक शरीर पृथगुक्तम्।

इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात् ॥

दुःखमित्यनुवर्तते।

सुखं दुःखानुषंगाद् खम ॥

दुःखेनानुषङ्गोऽविनाभाव· सुखेऽतावच्यवस्य दु.खहेतुत्वम्। एतेनोपचारादेव शरीरादिषु दुःखशब्द प्रयुक्त इति दुःखस्वरूपतया हि भाव्यमानाः शरीरादय स्वविषये वैराग्यहेतवो भवन्ति।

दुःखं तु बाधनापीडासंतापात्मकं मुख्यतयैव भवति ॥

दु खशब्दवाच्यमितिशेष ।

तस्य निर्वर्तकमसाधारणकारणं अविद्यातृष्णे धर्माधर्मौ चेति ॥

तस्य गौणमुख्यभेदाभिन्नस्य दुःखस्य। निर्वर्तकमित्यस्य व्याख्या असाधारणकारणमिति। यद्यपि धर्म सुखस्यैव कारण तथापि सुखस्य दु.खानुषंगेण दु.खवर्गान्तःपातित्वाद् दु.खहेतुरुक्त। प्रवर्तकस्य तस्यापि हेयत्वपरिज्ञानार्थमिति। अविद्यादीना लक्षणमाह-

सम्यगध्यात्मविद्भिः प्रदर्शितार्थे विपरीतज्ञानमविद्या सह संस्कारेण ॥

आत्मन्यधिकृत्य वर्तत इत्यध्यात्म शरीरादि। सम्यग्यथा भवति तथाऽध्यात्म विदन्तीति सम्यगध्यात्मविद', ते प्रदर्शिते प्रकटीकृतेऽर्थे—

"अस्थिस्थूण स्नायुयुत मासशोणितलेपन।
चर्मावनद्ध दुर्गन्धिपूर्ण मूत्रपुरीषयोः ॥
जराशोकसमाविद्धं रोगायतनमातुरं।
रजस्वलमनित्य च भूतावासमिम त्यजेत् ॥

इत्यादिना तस्मिन्विपरीतज्ञानम्

" अमृतस्येव कुडानि सुखानामिव राशयः ।
रतेरिव निधानानि योषितः केन निर्मिताः ॥

इत्येवरूपाऽविद्या । प्रलयाद्यवस्थाया विपरीतज्ञानाभावेऽपि पुनः शरीराद्युत्पत्तिश्रवणात् शास्त्राभ्यासजनिततत्त्वज्ञानवतामपि रागद्वेषाद्यभिभवदर्शनादविद्याऽस्तीत्याह सह संस्कारेणेति ।

पुनर्भवप्रार्थना तृष्णा ॥

पुनर्भवस्य विशिष्टशरीरादिलाभस्य प्रार्थना याच्ञा ।

सुखदुःखयोरसाधारणहेतू धर्माधर्मौ ॥

सुखस्यासाधारणो मुख्यो दुःखस्याकारणभूतो हेतुर्धर्मः । दुःखस्य पीडात्मकस्यासाधारणो सुखस्यानिमित्तभूतो हेतुरधर्मः ।

हानं दुःखविच्छेदः ॥

दुःखस्यैकविंशतिभेदाभिन्नस्य विच्छेदो हानिः ।

आत्यंतिकं न कदाचित्कथंचिद्दुःखसंबध इत्यर्थः ॥

न कदाचित्कथंचिद्दुःखविच्छेदसद्भावेऽपित्या त्यंतिक हानमुच्यते । विनष्टाया अपि दुःखव्यक्तेस्तत्पत्यभावेऽपि तज्जातीयस्य व्यक्तयन्तरस्योत्पादात् ।

तस्योपायस्तत्त्वज्ञानमात्मविषयम् ॥

यद्यपि द्वादशविधप्रमेयविषय सूत्रेऽभिहित तथाप्यात्मनः प्राधान्यज्ञापनार्थमात्मविषयमित्युक्तम् । तथाहि पूर्वं शरीरादिषु हेयत्वेन ज्ञानोत्पादे ततस्तद्व्यतिरिक्तात्मनि च श्रुत्यादिप्रमाणनिश्चिते पश्चात्तत्रैव ज्ञानोद्भासो निःश्रेयससाधनम् । अत्र सर्वादिका श्रुति वदति ।

तथा चोक्तं " आत्मा वारे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः "
(बृ. उ. २-४-५) इति ।

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः ॥

वाशब्दोऽवधारणे । एते श्रवणमननध्यानरूपा दर्शनस्यात्मविषयसाक्षात्कारज्ञानस्य हेतवः । आत्मज्ञानं च निःश्रेयसकारणमित्यत्र श्रुतिं दर्शयति।

तरति शोकमात्मविदिति (छा. उ. ७-१-३) ॥

आत्माद्वैतज्ञानमेव निःश्रेयससाधनमिति मतनिरासार्थमाह ।

स द्विविधः परश्चापरश्चेति ॥

उभावप्येतौ मुमुक्षुणा ज्ञातव्यौ ।

तथा चोक्तम् " द्वे ब्रह्मणी वेदितव्ये परं चापरं च ॥"

आदिग्रहणात् द्वा सुपर्णा सयुजा सखाया (मु. ३-१-१) इत्यादिश्रुतिः

" द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

इति स्मृतिश्च स्वीक्रियते । तत्र परापरयोर्लक्षण तत्र प्रमाणं चाह ।

तत्रैश्वर्यविशिष्टः संसारधर्मैरीषदप्यसंस्पृष्टः परो भगवान्महेश्वरः सर्वज्ञः सकलजगद्विधाता ॥

ऐश्वर्यं सकलपुरुषार्थाधिष्ठातृत्वं तेन विशिष्टो युक्तः । संसारधर्मै रागद्वेषमोहदुःखादिभिरीषदपि सर्वदाप्यसंस्पृष्टः सर्वज्ञोऽनादिरिति शेषः । गच्छति विनश्यति तच्छीलं जगत्सकलस्य विनश्वरस्य वस्तुनो विधातेति लक्षणम् । प्रश्नपूर्वकं प्रमाणमाह ।

स कथं ज्ञातव्यः । अनुमानादागमाच्च । तथाहि विवादाध्यासितमुपलब्धिमत्कारणकम्, अभूत्वाभावित्वाद्वस्त्रादिवदिति ॥

उपलब्धिः कारणसाक्षात्कारः । न च धर्मिविशेषस्यानिर्देशात्सन्दिग्धाश्रयो हेतुरिति वाच्यम् । साध्यविशेषाभिधानेन यत्र बुद्धिमत्पूर्वकत्वेन विवादस्तस्यैवाङ्कुरादेः पक्षीकारात् । अथेश्वरकारणत्वे साध्ये साध्यविकलो दृष्टान्तः, वस्त्रादावीश्वरकारणत्वासिद्धेः, व्याप्त्यसिद्धिश्च । बुद्धिमन्मात्रकारणत्वे च साध्ये विवक्षितविशेषासिद्धिः सिद्धसाध्यता च । संसारिणामेव धर्मद्वारेणाङ्कुरादिकारणत्वादित्याशङ्क्याह ।

१ ग कर्तृकम् । घ कर्तृपूर्वकम् ।

सामान्यव्याप्तेरनवद्यत्वेन निर कर्तुमशक्यत्वात् । तत. सामान्यसिद्धौ पारिशेष्यात्कार्यविशेषाच्च कर्तृविशेषसिद्धि. ॥ चित्रादिकार्यविशेषात्कर्तृविशेषसिद्धिवदिति ॥

सामान्यव्याप्तेः यत्कार्यं तत्स्वकारणसाक्षात्कारोधारकारणकमित्येवंरूपायाः । परिशिष्यते येनासौ परिशेष. प्रसक्तप्रतिषेधः । न ह्यचेतनस्यासर्वज्ञस्य शरीरिणो वाङ्कुराद्यशेषकार्ये नैरन्तर्येण हेतुत्व घटते. अतो विवादाध्यासित कार्यमशरीरसर्वज्ञपूर्वकमस्मदाद्यजन्यत्वात । यदेवविध साध्य न भवति तदस्मदाद्यजन्यकार्य न भवति यथा घटादीति व्यतिरेकी । कार्यविशेषाच्चेत्यनेनान्वय सूचयति । तथाहि विवादपद स्वोत्पादनप्रवीणज्ञातृकारणक विशिष्टकार्यत्वाच्चित्रवत । यत्त कैश्चिच्छरीरस्यापि व्यामावनुप्रवेशात्सिद्धि. स्यात्तदसिद्धौ कर्तुरप्यसिद्धिरित्युच्यते तत्र यद्यङ्कुरादिक शरीरिकर्तृक कार्यत्वाद्वस्त्रादिवदित्युच्यते तदा प्रत्यक्षेणव देशविरुद्धो हेतु । अङ्कुराद्युत्पत्तिसमये शरीरस्यानुपलब्धिबाधितत्वात् । न च तदसिद्धौ कर्तुरप्यसिद्धिर्बाधकाभावात, न हि कार्यत्वेन वहवनुगणत्वासिद्धो विनाशित्वस्याप्यसिद्धिरस्ति । अथ क्षित्यादिकमकार्यमकर्तृक वा शरीराद्यजन्यत्वाद्गगनवदित्युच्यते. तत्राद्ये साध्येऽङ्कुरादिभिरनैकान्तिकत्वाद द्वितीये तु साध्ये विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात शरीराद्यजन्यत्व नाम शरीरव्यतिरिक्तेनजन्यत्व हेतु स्यात । ततश्च साधनविकलो गगनदृष्टान्त ।कि च नदीस्रोत पतितचम्पककर्मणोऽपि पक्षीकारात शरीराजन्यत्व भागासिद्धम । अथेश्वर शरीरी कर्तृत्वादस्मदादिवत । तन्न, आश्रयासिद्धत्वात तत्सिद्धौ तद्ग्राहकप्रमाणबाध. । ईश्वर कर्ता न भवति, अशरीरत्वात, मुक्तात्मवदित्युच्यमाने व्याप्यत्वासिद्धो हेतुः. आश्रयासिद्धो वा, प्रतिज्ञापदयोर्व्याघातो धर्मिग्राहकप्रमाणबाधश्च । किं च चम्पक कम्पत इत्यादावशरीरस्यापि वृक्षादे कर्तृत्वाभ्युपगमात्पक्षेऽनैकान्तिक इत्यलम् ।

एको हि रुद्रो न द्वितीयाय तस्थु । य इमाल्लोकानीशत ईशनीभि· (श्वे. ३-२) इत्याद्यागमाच्च ॥

ईश्वरो ज्ञातव्य इति शेषः । द्वितीयायेति सहार्थे तृतीयास्थाने चतुर्थी ।

ईश्वनीभिरिच्छादिशक्तिभिरिमाँल्लोकानीशतेऽधितिष्ठति । अपरात्मनो लक्षणमाह ।

संसारफलोपभोक्ताऽपरः ॥

न विद्यतेऽन्तः कालतो देशतः संख्यातश्चेत्यनन्तः । नित्यो व्यापकोऽसंख्यश्चेत्यर्थः । तत्सद्भावे च प्रत्यक्ष प्रमाणम् । तथा हि मनोव्यापारे सति प्रत्यात्ममहं सुखी, अहं दुःखीति प्रत्ययो दृष्टः, न चासौ शरीराद्यालम्बनः, शरीराद्यप्रतीतावप्यन्धकारेऽहमिति प्रत्ययोत्पादात्सुखादीनां शरीराद्यनाश्रयत्वात् । स्थूलोऽहं, कृशोऽहमिति तु प्रत्ययस्य चक्षुषा स्पर्शनेन वा शरीरग्रहणे सत्येव भावाद्यद्यपि शरीरालम्बनत्वं तथाप्यहमित्यभेदप्रत्ययस्तत्र भ्रान्त एवमशरीरमिति भेदावभासेन बाधितत्वात् । प्रत्यक्षसिद्धेऽपि प्रतिपद्यमान परे प्रत्यनुमानमाह ।

स खलु बुद्ध्यादिकार्याणामाश्रयभूतोऽनुमातव्य ॥

बुद्ध्यादिकं क्वचिदाश्रितं भावरूपकार्यत्वाद् गुणत्वाद्वा रूपादिवत् । व्याप्तिं दर्शयति ।

न हि कार्यमनाधारकं किंचिदुपलब्धम् ॥

सिद्धसाध्यतापरिहाराय भूतचैतन्यं निषेधति ।

न चेन्द्रियाणामाश्रयत्वं युक्तम् । उपहतेन्द्रियस्य विषयस्मरणायोगात् ॥

उपहतमिन्द्रियमुपहतेन्द्रियं उपहतम्येन्द्रियस्य विषयं स्मरणायोगप्रसङ्गात् । कस्मादित्यत्राह ।

अन्यानुभूतेऽर्थेऽन्यस्मरणादर्शनात् ॥

इन्द्रियमनुभवितृ न भवति, संस्कारसद्भावेऽपि सर्वदैवास्मर्तृत्वात्पाषाणादिवदस्मर्तृत्वाच्चक्षुराद्यभावेऽपि रूपादिविषये स्मरणदर्शनात् । किं चेन्द्रियाणां ज्ञानाद्याधारत्व एकस्मिन्नपि शरीरे नानाचेतनानां कदाचिद् विप्रतिपत्तिः स्यात् तर्हि शरीरमेव चेतनमस्त्वित्याशङ्कयाह ।

अत एव शरीरस्यापि बाल्यकौमारयौवनादिभेदभिन्नत्वादत्वादस्मरणम् ॥

यतोऽन्यानुभूतेऽर्थेऽन्यस्मरण न भवति, अत एव शरीरस्य स्मरण न संभवति, अतश्चानुभवितृत्वमपि नास्तीत्यर्थः । शरीरस्यापि बाल्यकौमारयौवनादिभेदभिन्नत्वात् । न च तत्रावस्थाभेदमात्रं नावस्थावच्छिन्नमिति वाच्यम्। महत्त्वभेदस्य श्रयभेदाव्यभिचाराद महत्त्वभेदस्याश्रयभेदमूलत्वात्कुवलयामलकबिल्वादिषु परिमाणभेदवत् । बौद्धराद्धान्तेऽपि स्मरण नोपपद्यत इत्याह ।

एतेन पूर्वबुध्द्यनुभूतेऽर्थे उत्तरबुद्धेः कार्यकारणभावात्स्मरणमपास्तमन्यत्वाविशेषात् ॥

अनुभवितृस्मर्त्रोर्भेदेऽपि परस्परं कार्यकारणभावस्य विद्यमानत्वात् कारण बुद्धयानुभूत चेत्कार्यबुद्धि स्मरति तदोपाध्यायानुभूत च शिष्यः स्मरेत् । एतद्दूषणपरिहारायापर आह ।

कार्पासे रक्ततावदिति चेत ॥

यथा कार्पासबीजे लाक्षादिना कृता रक्तता भेदाविशेषेऽपि तद्बीजसन्तान एव पुष्प फल वा रक्ततामुत्पादयति न पुनर्बीजान्तरसन्ताने तद्वदुपाध्याय बुद्धिजनितसंस्कारस्तस्मिन्नेव सन्ताने स्मृति जनयति न पुनः शिष्ये तस्य सन्तानान्तरत्वात् । तदुक्त

यस्मिन्नेव हि सन्ताने आहिता कर्मवासना ।
फल तत्रैव बध्नाति कार्पासे रक्तता यथा ॥

कर्म पुण्यापुण्यरूपः कर्म चासौ वासना चेति कर्मवासना तच्चोपलक्षणमनुभवजनितसंस्कारायाः परिहरति ।

न । साधनदूषणाऽसंभवात् ॥

एतद्विवृणोति ।

अन्वयाद्यभावान्न साधनमप्रसिद्धत्वाद्यनुद्भावनाच्चादूषणम् ॥

न तावत्स्वपक्षसाधनमिदं स्मृतिः कार्यकारणभावात्संभवतीति । कार्पासे रक्ततावदित्यत्रान्वयाभावात् यत्र न स्मृतिस्तत्र न कार्यकारणभाव इति व्यतिरेकाभावात् । नापि परपक्षदूषण पूर्वबुध्द्यनुभूतार्थमुत्तरबुद्धि-

न स्मरति, अनुभवितुरन्यत्वात्सन्तानान्तरबुध्दिवदित्यस्य हेतो कार्पासे रक्तता वदित्यनेनासिद्धत्वाद्यन्यतमदोषस्यानुद्भावनात् । किं च सम नाना कार्यकारण भाव एव सन्तान इति बौद्धाना कृतान्त । तादृशश्च कार्यकारणभाव शिष्योपाध्यायबुद्धीनामस्तीति प्राक्तनमेव दूषणम् । दूषणान्तरमाह ।

न च कर्पासेऽपि निरन्वयनाशोत्पादे रक्ततोपपद्यते कर्पासान्तरवत् ॥

निर्गतोऽन्वय. कारणपरम्परा यत्रासौ निरन्वय' स चासौ नाशश्च निरन्वयनाशः । तस्मिन्सत्युत्पादो यस्य कार्यकारणभावस्य स निरन्वयनाशोत्पादः, तस्मिन्सति कर्पासे न रक्ततोपपद्यते तद्वत्त्व नार्हति यथा कर्पासान्तरे तस्मात्त्वापि बीजावयवाना रक्तानामनुवृत्त्यैव कर्पासे रक्ततोपपद्यते । न च क्षणिकवादिन पक्षेऽनर्भवितु' संस्कारस्य वानुवृत्तिरस्ति तदभावे स्मरणमपि न स्यादिति भावः ।

एतेनैव क्षणिकत्व निरस्त ॥

अनुभवितुर्विनाशेऽन्यस्य स्मरण सर्वथा नोपपद्यते । एतेनेत्यनेन "यत्सत्त क्षणिक यथा जलधर सन्तश्च भावा अमी " इत्यनुमानस्य तर्कबाधा दर्शिता । तथाहि सर्वस्य पक्षीकारे दृष्टान्ताभावादसाधारणो हेतु' । विवादाध्यासित इति पक्षीकारे जलधरस्यापि द्वित्रिक्षणावस्थायित्वा साध्यविकलो दृष्टान्त' । एव देशे प्रत्यक्षबाध दर्शयति ।

प्रत्यभिज्ञाख्येन च प्रत्यक्षेण स्फटिकादिष्वक्षणिकत्वं गृह्यते ॥

स एवाय स्फटिको या मया वत्सरात्पूर्व दृष्ट इति पूर्वापरकालकलितवस्तुग्राहि प्रत्यक्षज्ञानमुत्पद्यत इति प्रत्यक्षकदेशाविरुद्धमनुमानम्, तथा यस्याह तत्पुत्रमद्राक्ष तस्य पौत्र पश्यामीत्यात्मन्यपि प्रत्यभिज्ञानमुत्पद्यते । परमतमाशङ्कते ।

प्रदीपादिष्विव भ्रान्तमिति चेत ॥

पूर्वप्रज्वलित विनष्टे पुनरन्येन प्रज्वालित प्रदीपे स एवाय प्रदीप इति प्रत्यभिज्ञान भेदग्राहिपुरुषेण प्रत्यक्षेण बाध्यमानत्वाद्यथा भ्रान्त तथात्रापीत्यर्थः । यदि वैकस्मिन्नेव प्रदीपसन्ताने विवादाध्यासित प्रदीपो नैको भिन्नकालेन्वनजन्यत्वात्सप्रतिपन्नानेकप्रदीपवदित्यनुमानेन बाध्यमानत्वात्प्रत्यभि-

प्रयोगस्तु धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रिया जनयतः, एकद्रव्यत्वे सति क्रियाहेतुगुणत्वाद गुरुत्ववत् । युगपदनेकशरीराधिष्ठातृत्वे प्रमाणमाह

तथा चोक्तं पुराणे—

आत्मनो वै शरीराणि बहूनि मनुजेश्वर।[1]
प्राप्य योगबलं कुर्यात्तैश्च सर्वा महीं चरेत् ॥
भुंजीत विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् ।
संहरेच्च पुनस्तानि सूर्यस्तेजोगणानिव ॥ इति ॥

श्लोके युगपदिति सम्प्रदायादवगम्यते । उपसहरति ।

तदेवमपरात्मतत्त्वज्ञानं परलोकसद्भावेन परलोकप्रवृत्त्युपयोगित्वादधर्मक्षयहेतुत्वाच्च निःश्रेयसाङ्गमिति ॥

एतेन नित्यात्मज्ञानमात्मनि शाश्वतस्नेहजननद्वारेण संसारकारणमिति वदन्तो बौद्धा अपि प्रत्युक्ताः । नित्यपरलोकाभावे हि

' यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥

इति वदतो लौकायतिकस्येव यथेष्टचेष्टाप्रसङ्गाद् अधर्मक्षयहेतुत्वे च 'तरति शोकमात्मविद्' इत्यागमः प्रमाणम् । परमात्मज्ञानस्य निःश्रेयसहेतुत्वं दर्शयति ।

परमात्मतत्त्वज्ञानं च तदुपासनाङ्गत्वेनापवर्गसाधनम् ॥

तस्य परमात्मन उपासनमाराधनं तदुपासनं परमात्माऽऽराधनं तस्याङ्गत्वेनोपायत्वेन ।

स चोपासनविधिः ॥

आराधनप्रकारः ।

क्लेशकर्मक्षयसमाधिलाभार्थमनुष्ठानम् ॥

---

१ मनुजेश्वरः ।

क्लेशकर्मक्षयार्थं समाधिलाभार्थं चेत्युभयत्राप्यर्थशब्दसबधः । येनकेनचिदनुष्ठानेन रागद्वेषमोहाख्याः क्लेशाः क्षीयन्ते परमात्मनि च चित्तैकाग्र्यलक्षणः समाधिः प्राप्यते तदनुष्ठानं परमेश्वरोपासनविधिरिति । अत्र पतञ्जलिसूत्रसंवाद दर्शयति ।

तथा चोक्तम् । तपः स्वाध्यायेश्वरप्रणिधानात्मिका क्रिया योगः (यो. सू. २-१) । क्लेशतनूकरणार्थं समाधिलाभार्थश्चेति (यो. सू. २-२) ॥

यद्यपि पतञ्जलिसूत्रे समाधिभावनार्थः क्लेशतनूकरणार्थश्चेति पाठस्तथापि हार्थक्रममाश्रित्यान्यथा पाठः कृतः । सूत्रार्थं कथयति ।

तत्रोन्मादकामादिदोषव्यपोहार्थमाध्यात्मिकादिद्वंद्वसहिष्णुत्वं तपः ॥

एवमेतानि विविधानि दुःखानि शान्तचित्तेन नियमपूर्वकं सहमानस्य यद्द्वंद्वसहिष्णुत्वं निवर्तकधर्मसंचयमधर्मविनाशं च कुरुते तत्तप इत्युच्यते । चान्द्रायणाद्यपि चानशनादिजनितद्वंद्वसहरूपत्वात्तपः।निवर्तकधर्मसंचयाच्च योगप्रवृत्तिहेतुः श्रद्धातिशयो भवति, अधर्मनाशाच्चोन्मादकामव्याध्यादीनां योगान्तरायाणां प्रलयः, ततश्चित्तसमाधिः । तपो धर्माधर्मसंचयक्षयहेतुरित्यत्र प्रमाणं न त्वादिवचनम् । तथाहि

तमोमूलमिदं सर्वं यद्दैवं मानुषं सुखम् ।
तपोमुख्यं बुधैः प्रोक्तं तमोन्तं वेददर्शिभिः ॥
महापातकिनश्चैव शेषाश्चाकार्यकारिणः ।
तमसैव तु मुच्यन्ते तसेन किल्बिषात्ततः ॥
यत्किञ्चिदेनः कुर्वन्ति मनोवाङ्मूर्तिभिर्जनाः ।
तत्सर्वं निर्दहन्त्याशुस्तपसैव तपोधनाः ॥ इति ।

स्वाध्यायस्वरूपमाह ।

प्रशान्तमन्त्रस्येश्वरवाचिनोऽभ्यासः स्वाध्यायः ॥

ईश्वरवाचिन इति क्षुद्रसिद्धिहेतुनिरासाय । प्रशान्तग्रहणं परमात्मनिष्ठेन भावितव्यामिति ज्ञापनार्थम् । ईश्वरग्रहणाद्गीतादियोगशास्त्राभ्यासो वा स्वाध्यायः । ईश्वरप्रणिधानमाह ।

परमेश्वरतत्त्वस्य प्रबन्धेनानुचिन्तनमीश्वरप्रणिधानम् ॥

प्रबन्धेन नैरन्तर्येणानुचिन्तनं स्मृतिः । पुष्पादिभिर्वाऽऽराधनं **सर्वकर्मणां परमगुरावार्पणं** वा । सोऽयं तपःस्वाध्यायेश्वरप्रणिधानादिक्रिया योगसाधनत्वाद्योग इत्युक्तः स च क्लेशतनूकरणार्थ इत्युक्तः । अतः क्लेशस्वरूपमाह ।

समासतो रागद्वेषमोहाः क्लेशाः । समाधिप्रत्यनीकसंसारापत्तिद्वारेण क्लेशहेतुत्वात् ॥

आसक्तिलक्षणो रागः, कोपो द्वेषः, मिथ्याज्ञानं मोहः । समाधिप्रत्यनीकेत्यादिना क्लेशशब्दवाच्यत्वे निमित्तमुक्तम् । मुख्यस्तु क्लेशो दुःखमेव । रागादयो हि समाधिविरोधित्वेन संसारापादनद्वारेण पुरुषं क्लेशयन्तीति क्लेशा उक्ताः । समासत इति पदं तु सांख्यमतनिरासाय । ते हि अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः (यो. सू. २-३) इति ब्रुवाणाः पञ्चक्लेशानभ्युपागमन् । तच्चायुक्तम् । अस्मिताभिनिवेशयोरत्रैवान्तर्भावात् । तथाहि । दृग्दर्शनशक्त्योरेकात्मतैवास्मिता (यो. सू. २-६) दृक्शक्तिः पुरुषः, दर्शनशक्तिर्बुद्धिः, तयोर्भिन्नयोरेकात्मकतयाऽभेदेन प्रतिपत्तिर्मोह एव । तथा स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः (यो. सू. २-९) मरणत्रासजनितः सर्वदाहं भूयासमिति योऽयं संकल्पः स चाभिनिवेशः स चानादिमरणजनितदुःखानुभवारूढवासनाजन्यत्वात् स्वरसवाहीत्युक्तः । सोऽपि तथात्यन्तमूढानां दृश्यते तथा ज्ञातपरस्य विदुषोऽपि रूढः प्रतीयते स च मोह एव । अवश्यभाविनि मरणे सदा भूयासमित्येव ज्ञानस्यान्यथाप्रत्ययत्वाद्विदुषामप्यान्तरदोषान्मोहो दृष्टः । यथा सूर्यादिलिङ्गानुमितदिग्भागस्यापि दिङ्मोह इति । यथा तपःस्वाध्यायेश्वरप्रणिधानादिक्रिया योगः क्लेशविनाशहेतुस्तथा योगाङ्गान्यपीति तानि दर्शयति ।

तथा यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि (यो. सू. २-२९)

अनुष्ठेयानीति शेषः । अङ्गानि कारणानि । यमादीनां योगहेतुत्वेन

कारणत्वात् । समाधस्तु योगात्मकस्याप्युत्तरोत्तरस्य समाधानचयस्य हतुत्वा दगत्वमिति । आदावहिंसा यमानाह ।

तत्र देशकालावस्थाभिरनियता पुरुषस्य शुद्धिवृद्धिहेतवो यमा अहिंसाब्रह्मचर्यास्तेयाद्य ॥

आदिशब्देन सत्यापरिग्रहयो परिग्रह शु द्धरधममदमाना दक्षय । वृद्धिधमापचय । तद्धतवो य देश ादभिरनयता अहिंसादय सर्वस्मिन्देशे सर्वस्मिन्काले सर्वस्यामवस्थाया न हस्य म ब्रह्मचय चरा मि न चोरयाम नासत्य वदाम ना पि परम्या गृह्ण म ति सकल्पपूवकास्ते यमा । यदि पुनस्तीथाद। ना हिन स्म ब्रह्मचय चरामाति दशादिनियतास्तदा नियमा एव न यम

दशकालावस्थाद्यपेक्षिण पुण्यहतव क्रियाविशेषा नियमा देवता प्रदक्षिणसन्ध्योपासनजपाद्य ॥

देशविशेष नम्नि दवतापदक्षिणम कालविशेषापेक्ष सन्ध्योपासनम् । जपादया त शुद्धावस्थामात्रापेक्षणी पुण्यविशेष प्रात तु दशविशेषापेक्षण च अनत गङ्गासन्निधाव यादिवचनात् अ येऽपि तीर्थादिव पापेक्षिण क्रयाविशेषा नियमा व दत या । पातञ्जलास्तु निवृत्ति लक्षणा यमा इ याह । तथा च तम । आहसास यास्तयब्रह्मचर्यापरिग्रहा यमा (यो स) । शोचस तोषतप स्व याय श्वरप्र णधानानि नियमा (या सू ३) अस यवचननिवृत्तावह सत्य विवक्षितम् । आसन लक्षयात

योगकर्मविरोधिक्लेशजयार्थ करणब ध आसन पद्मकस्वस्तिकादि ॥

करणाना शरीरावयवाना पदादाना ब ध सयम पद्मस्वस्तिकाद्यनेक प्रकार प्राणायामोपयोगी यस्तदासन स्थिर सुख चोपवेशनामत्यर्थ । स च योगक्रियाविरोधिना ये क्लेशा क्लेशहेतवो व्याधयस्तेषा जयार्थो विना शार्थ इति प्रयोजनोपन्यास । प्राणायाम लक्षयात ।

कोष्ठ्यस्य वायोर्गतिविच्छेद प्राणायामो रेचकपूरककुम्भकप्रकार ॥

कोष्ठे शरीरान्तर्देशे भवः कोष्ठयो वायुः श्वासप्रश्वासरूपः, तस्य यो गतिविच्छेदः स प्राणायामः स च त्रिविधो रेचकादिभेदेन । तत्रान्तर्गतस्य वायोर्बहिर्निःसारण रेचकः । बाह्यस्य शरीरपूरण पूरक । पूरितस्य शरीरान्तर्धारण कुंभक । वायुवशीकरणोपायमाह ।

स च शनैः शनैर्जेतव्यो वनगजेन्द्रवत् ॥

यथा गजेन्द्रः शनैः शनैरुपायेन वशीक्रियमाणो महान्तमुपकारं करोति बलादप्रयोगेण गृह्यमाणस्त विनाशयति तथा वायुरपि शनैर्ध्रियमाणो महान्तमुपकारं निःशेषं रागादिमत्वं विनाश्य समाधिं प्रापयति । अप्रयोगेण बलाद्ध्रियमाणस्तु वातो गुल्माद्यनर्थमेव जनयतीति । प्रत्याहारमाह ।

समाधिप्रत्यनीकार्थेभ्यश्चेतसः समन्ताद्व्यावर्तनं प्रत्याहारः ॥

समाधेः प्रत्यनीका विरोधिनो ये पुत्रकलत्रादयस्तेभ्यः समन्तात्सर्वेभ्यश्चेतसो व्यावर्तनं व्यावृत्तिः प्रत्याहारः ।

प्रत्याहृते चेतसि बाह्येन्द्रियाण्यपि प्रत्याहृतानि भवन्ति चेतोऽधीनत्वात्प्रवृत्तेः । प्रत्याहारेणैव च धारणलाभः ।

देशबंधश्चित्तस्य धारणा (यो. सू. ३-१)॥

शरीरावयवो नाभ्यादिर्देश इत्येके, बाह्यसूर्यमण्डलादिरित्यपरे, परमात्मा वात्र देशो विवक्षितः, तदाराधनप्रवृत्तत्वान्मोक्षार्थिन इत्याचार्याः । तत्र देशे चित्तस्य मनसो बन्धः प्रयत्नेन धारणं निश्चलीकरणं यत्सा धारणेति ।

तत्र प्रत्ययैकतानता ध्यानम् (यो. सू. ३-२)॥

तत्र धारणादेशे प्रत्ययस्य ध्येयालंबनस्यैकतानतासदृशप्रवाहो मध्ये प्रत्ययान्तरेणापरामृष्टो ध्यानम् ।

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः(यो. सू. ३ ३)॥

तदेव ध्यानमेव ध्येयाकारमात्रनिर्भासं स्वरूपेण प्रत्ययात्मकेन शून्यमिवेदं ध्येयमहं ध्यायामीति भेदेन ज्ञानशून्यं यदा भवति तदा समाधिरित्युच्यते । एतदेव यद्वा—

ध्यानोत्कर्षान्निवाताचलप्रदीपावस्थानमिवैकत्रैव चेतसोऽवस्थान स-माधिरभिधीयते ॥

उपसहरति ।

एवमेतानि योगागानि मुमुक्षुणा सर्वेषु ब्रह्मादिस्थानेष्वनेकप्रकार-दु खभावनयाऽनभिरतिसज्ञित पर वैराग्य महेश्वरे च परा भक्तिमाश्रित्या त्यन्ताभियोगेन सेवितव्यानि ॥

अनेकप्रकारेण स्वविभवातिशयितविभवदर्शितक्षयभावनया जनितानि दु खानि तेषा भावनया ब्रह्मादिस्थानेष्वनभिरतिरपेक्षाभावस्तत्सज्ञित तत्स्वरूप यत्तत्पर वैराग्यम् । योगागसेवाया फलमाह ।

ततोऽचिरेणैव कालेन भगवन्तमनौपम्यस्वभाव शिवमवितथ प्रत्य क्षत पश्यति । त दृष्ट्वा निरतिशय श्रेय प्राप्नोति ॥

निर्गतोऽतिशयो यस्मात्तन्निरतिशय श्रेयो मोक्ष, शिवज्ञानादेव मोक्ष इत्यत्र प्रमाण दर्शयति ।

तथाचोक्तम

यदा चर्मवदाकाश वेष्टयिष्यन्ति मानवा ।
तदा शिवमविज्ञाय दु खस्यान्तो भविष्यति ॥

(श्वे उ.६ २०) तमेव विदित्वाऽतिमृत्युमेति (श्वे ३ ८,६ १९)। तरति शोकमात्मविदिति ॥ (छा.)

चर्मेव चर्मवत् । यथा चर्म वेष्टयन्ति तथाऽऽकाश यदा वेष्टयन्ति मानवा स्तदा शिव परमात्मानमविज्ञाय सर्वस्य द खस्यान्तो भविष्यति । उपस हरति ।

तस्माच्छिवदर्शनान्मोक्ष इति ॥

मोक्षस्वरूपे विप्रतिपत्तेर्विद्यमानत्वात्प्रश्नपूर्वक वैशेषिकमतमादौ दर्शयति ।

क पुनरय मोक्ष । एके तावद्वर्णयन्ति समस्तविशेषगुणोच्छेदे सहारावस्थायामाकाशवदात्मनोऽत्यन्तावस्थान मोक्ष इति ॥

अत्यन्त सर्वदावस्थानमित्यनेन प्रलयावस्थाने विशेषकथनम् । वैशेषिक प्रति कश्चिच्चोदयति ।

कस्मात् ।।

सुखार्थैव प्रेक्षावता प्रवृत्तिन स्यात् अत सुखमात्रानुभवाऽभावाकार्य इति भाव । पर परिहरति

सुखदु खयोरविनाभावित्वेन विवेकहानानुपपत्तेरिति ।।

सुखहेतूनामवश्य दु खजनकत्वमाविनाभावित्वम मोक्ष प्रवृत्त्यनुपपत्तेरित्यस्य परिहारमाह

न च सुखार्थ एव प्रेक्षावता प्रवृत्ति । कण्टकादिजनितदु खपरिहारार्थत्वेनापि प्रवृत्तेरुपलम्भात ।।

इदानीमाचार्य स्वपक्ष दर्शयितुमाशङ्कते दूषयति

मोहावस्था वा मूर्च्छाद्यवस्थावदत्र विवेकिना प्रवृत्तिर्न युक्तेत्याहुरन्ये ।।

वैशेषिक योऽयं तेषामभिप्राय भाव दु खपरिहारार्थमेव प्रवृत्तिर्नोपपद्यते इति दर्शयति ।

दु खे सति सुखोपभोगाभ्यासभवात्कण्टकादिदु खपरिहारोऽपि सुखोपभोगार्थ एवेत्यसमो दृष्टान्त ।।

स्वमते यद्यपि मुमुक्षूणा प्रवृत्ति सुखानभवार्थाविवेकप्रवृत्तत्वात्तत्प्रतिपक्षप्रवृत्तिवादत्यनमानमुक्त तथापि प्रश्नपूर्वकमागमप्रमाणमाह ।

कुतो मुक्तस्य सुखोपभोगबुद्धिरिति चेत्। आगमात। उक्त हि ।

सुखमात्यन्तिक यत्र बुद्धिग्राह्यमतींद्रियम् ।

न वै मोक्ष विजानीयाद्दुष्प्रापमकृतात्मभिरिति ।।

तथा—आनंदं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते ।
विज्ञानमानंदं ब्रह्मेति (बृ. ३-९-२८) ॥

दुःखाभावेऽत्र सुखानन्दशब्दावुपचारेण प्रयुक्तौ, यथा भाराक्रान्तस्य वाहिकस्य तदभावे हि सुखी जातोऽहमिति प्रत्यय इत्याशंकायामाह ।

मुख्येऽर्थे बाधकाभावान्नोपचारकल्पना ॥

किं च भाराक्रान्तस्य तदपाये वाय्वादिस्पर्शवशात्सुखोत्पादे सत्येव सुखशब्दप्रयोगः । न पुनर्दुःखाभावेन चासंवेद्यमानो दुःखाभावः प्रवृत्त्यगमिति मुख्यसुखस्याभावे मोक्षप्रवृत्तिर्न स्यात् । सुख परोक्तमाशंकते ।

सुखसंवेदनयोर्नित्यत्वान्मुक्तसंसारावस्थयोरविशेषप्रसंग इति चेत् ॥

परिहरति ।

न । चक्षुर्घटयोः कुड्यादेरिव सुखतत्संवेदनयोर्विषयविषयिभावसंबंधप्रत्यनीकस्याधर्मदुःखादेः संसारावस्थायां सद्भावात् । तन्नाशे च मुक्तावस्थायां भवति सुखसंवेदनयोः संबंधः कुड्यादिनाशे चक्षुर्घटसंबंधवदित्यतो नाविशेषः ॥

संबंधप्रतिबंधकत्वमात्रेण कुड्यादिकमत्रोदाहृतम् । न पुनः कुड्यादेरिवाधर्मादेर्व्यवधायकत्वं संभवति, अमूर्तत्वात् । पुनः परमतमाशंकते ।

संबंधस्य कृतकत्वेन कदाचिद्विनाशप्रसंग इति चेत् ॥

सुखतत्संवेदनसंबंधस्य विनाशे मुक्तस्य संसारित्वप्रसंग इति चेत् ।

परिहराति ।

न । प्रध्वंसानैकान्तिकत्वात् ॥

विवादाध्यासितः संबंधः कदाचिद्विनश्यति कदाचित्कत्वाद्घटादिवदित्यस्य हेतोः प्रध्वंसेनानैकान्तिकत्वादित्यर्थः । परमतमाशंकते ।

वस्तुत्वे सतीति चेत् ॥

संबधो द्रव्यगुणकर्मसामान्यविशेषसमवायेभ्यो बहिर्भूतस्तदन्तर्भूतो वेति विकल्प्य पक्षद्वये दूषणमाह ।

न । द्रव्यादिष्वनन्तर्भावेन तदसिद्धत्वात् ॥

तस्य वस्तुत्वस्यासिद्धत्वात् ।

तदन्तर्भावे वा समवायादिभिः सह तत्संवेदनस्य संबधो न स्यादिति ॥

द्रव्यादिषट्पदार्थान्तर्भूतो हि न समवायस्याभावस्य वा संबध इति भावः । पुनः परमतमाशङ्कते ।

अदृष्टादिवशात्कर्मकारकं विषयस्तज्जनितं ज्ञानं विषयीति चेत् ॥

परिहरति ।

न । ईश्वरज्ञानस्य नित्यस्यार्थैः सह संबंधाभावप्रसंगात् ॥

अस्मदादिज्ञानस्याप्यतीतानागतादिपदार्थैः सह संबंधो न स्यात् । अतीतादिपदार्थस्य कारकत्वसंभवात् इत्यपि ज्ञेयम् ।

उपसंहरति ।

तस्मात्कृतकत्वेऽपि नित्यसुखसंवेदनसंबंधस्य विनाशकारणाभावान्नित्यत्वं स्थितम् । तत्सिद्धमेतत् । नित्यसंवेद्यमानसुखेन विशिष्टाऽऽत्यंतिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति ॥

इति काश्मीरिकसूर्यसूनुवासुदेवविरचितायां न्यायसारपदपञ्चिकायामागमपरिच्छेदः समाप्तः ।

न्यायभूषणमहाम्बुधौ बुधा येऽलमाविचरितु न जानते ।
तत्कृते कृतिरियं मया कृता न्यायसारपदपञ्चिकाभिधा ॥
भद्रं पश्येम प्रचरेम भद्रम् ॥

PREFACE.

I scarcely thought when last year the text and commentary were published, that the text required any notes or that I should write them. But from experience in the class-room, I felt how difficult it is for students to grasp the subject, even though the author presumes to teach the bare elements of Nyāya, yet his manner of treatment is so concise, his reasoning so compressed, and his style at times so cryptic, elliptical and dilemmatic that for even more than an average student, help of some kind or other is a real need. This book is intended to meet this demand. It grew out of my notes for class-lectures, and I have drawn upon various sources of information on the subject in their preparation. Prominent among these are the Nyāya Sūtra of Gautama with the scholium of Vātsyāyana, Athale's Tarkasamgraha, Keshavamishra's Tarkabhāshā, Jayasimha's commentary on the Nyāyasāra published by Vidyābhūśana, Sapta-padarthi edited by the late Dr Ghāte, Keith's Indian logic and atomism as also his Karma-mīmāmsa, and Sāmkhya, and the book on mediæval logic by the late Dr Satīśchandra Vidyābhūshana. I cannot express how greatly I am indebted to these different authorities.

But above all, to my Guru, Mahāmahopādhyāya Vasudeva Shāstri Abhyankar, I owe a debt which it would be extremely ungrateful not to acknowledge. To him I owe

the explanation of many technical subtleties, many difficult points which unaided were formidable indeed In fact all the merit that the book may have is due to him

